No. १५४८

Title कारिकावल्याः सिद्धान्तमुक्तावली टीका

Author म॰ म॰ पञ्चानन भट्टाचार्य

Extent ७९ Age १९०६ई

Subject न्यायशास्त्रं

कारिकावली सिद्धांतमुक्तावली समाख्यटीकासहिता

१५४४

७८

पन्ने

विशेष्ये विशेषणान्वययोपयोगिन्याकाङ्क्षा द्विविधा उत्थितोत्थाप्या च तत्र विशेषणोपादानोपपत्तिप्रतिसंधानपूर्वकविशेषणान्व
य्याकाङ्क्षात्वमुत्थिताकाङ्क्षात्वम् विशेषणोपादानानुपपत्तिप्रतिसंधानप्रयुक्तविशेषणान्वय्याकाङ्क्षात्वमुत्थाप्याकाङ्क्षात्वम् ॥

पत्रं ७८

ॐकारः स्मरकार्मुकस्य सुरतक्रीडापिकीनां रवो ॐकारो रतिमंजरीमधुलिहां लीलाचकोरीध्वनिः तन्व्याः कंचुलिकां पुसारणभुजोत्क्षेपस्खलत्कंकणः काणः ... नवनवयोजात्स्याभवे रणस्तु नः नूतनेत्यनेन नूतनजलधरः शीघ्रवृष्टिप्रदस्तथायमपि स्वाभिलषितफलप्रदाता इति सूचितम् ६ समाप्त्यधिकरणात्यन्ताभावप्रतियोगित्वादित्यर्थः मंगलस्य कारणत्वाभावे व्यतिरेकव्यभिचाररूपहेतुमाह विनापीति १ चूडामणीत्यत्र श्लोके समाप्तिपुनरुपादानं रूपद्वयं १

ॐ श्रीगणेशाय नमः चूडामणीकृतविधुर्वलयीकृतवासुकिः भवो भवतु भव्याय लीलाताण्डवपण्डितः १ निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः २ सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्वला विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ३ विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति नूतनजलधररुचये गोपवधूटीदुकूलचौराय तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय १ ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम् विनापि मङ्गलं नास्तिकादीनां ग्रन्थे निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न यतः अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां संभवति दृष्टफलकत्वे ऽदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वात्समाप्तिरेव फलं कल्प्यते इत्यपि च यत्र

तत्रापि विश्वजितादौ यागे स्वर्ग एव कल्प्यतामत आह उपस्थितेति आरब्धं कर्म मे निर्विघ्नपरिसमाप्यतामिति प्रार्थनायाः प्रवृत्तपुरुषकामनाविषयत्वेनोपस्थितत्वादित्यर्थः १ नास्तिकग्रन्थः साध्यपुरुषप्रणीतत्वसंबंधेन मंगलवान् स्वप्रतियोगिचरमवर्णाघटितत्वसंबंधेन समाप्तिमत्त्वात् भारतादिवदिति प्रयोगो बोध्यः अत्र प्रयोजनं मनो कल्प्यते इत्यत्र प्रपञ्चेव ॥ २
मंगलस्य समाप्तिफलकत्वे अन्यफलकत्वे ऽसति सफलत्वात् यद्यन्यफलकत्वे ऽसति सफलं तत्तत्फलकमिति परिशेषानुमाने ३

जनितायेवक्षितान्वयबोधस्य पदोत्तरान्वयबोधविषयायाः पुनरुपादानं समाप्तिपुनरावर्ते १

ननु निःफलत्वान्मंगलाचरणमयुक्तं न च निःफलत्वमसिद्धं तस्य फलविशेषप्रान्यत्वरूपफलत्वात् साध्यनादित्वमिति न्याये याप्तीकातेनविति ४

वचप्रतिपाद्ययुक्तिभिः २

मंगलस्य ... विघ्नविघातायेति विघ्नविघातादेः मंगलसमाप्ति ... व्यभिचारादित्यर्थः ३

मंगलं वेदबोधितकर्त्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शादिवत् संशयनिश्चयसाधारणविघ्नज्ञानमेव प्रवर्तकं१ ननु निर्विघ्नपुरुषानुष्ठितमंगलस्य
अत्र न बलवत्तिरस्यैव तत्त्वात् विघ्नध्वंसं प्रति कारणत्वं बोधितं न च तद्बाधितार्थबोधकत्वेन दुष्टस्याप्रामाण्यमिति मा माशंकां निरासार्थमाह न चेति तन्प्रति योगिरूपकारणाभावेनाकार्यानुदय इति न कारणत्वं
बाधितं न वेदाप्रामाण्यं१ सति विघ्न इति तथाचोपदर्शितस्थले प्रतियोगिरूपकारणाभावेन विघ्नध्वंसरूपकार्यानुदयोपपत्तौ कारणताया अबाधितत्वेन न कारणताबोधकवेदाप्रामाण्यमिति भावः६
अतएव नाशं प्रति प्रतियोगिनः कारणता७ मंगलस्य स्वाव्यवहितोत्तरोत्पत्तिकत्वसंबंधेन मंगलविशिष्टविघ्नध्वंसत्वविजातीयविघ्नध्वंसत्वं कार्यतावच्छेदकं८ ननु विघ्नसंशये मंगलाचरणमेवा
सिद्धमित्यत्राह९ ननु मास्तु विघ्नध्वंसस्तु यापि समाप्तिः स्वात्यतआह विघ्नध्वंस इति स्वजन्यविघ्नध्वंससंबंधेन मंगलाभावान्न समाप्तिरित्यर्थः३

मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्त
रो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् प्रचुरस्यास्यैव च बलवत्तरविघ्ननिवारणे कारणत्वं बोध्यम्
विघ्नध्वंसस्तु मंगलस्य द्वारमित्याहुः नव्यास्तु मंगलस्य विघ्नध्वंस एव फलं समाप्तिस्तु
बुद्धिप्रतिभादिकारणकलापात् न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य मंगलस्य नि
ष्फलत्वापत्तिरिति वाच्यम् इष्टापत्तेः विघ्नशंकाया तदाचरणात् तथैव शिष्टाचारात्
न च तस्य निष्फलत्वे तत्र बोधकवेदाप्रामाण्यं सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्
अतएव पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेपि न तद्बोधकवेदाप्रामाण्यं मंग
लं तु विघ्नध्वंसविशेषे कारणं विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः क्वचित्तु
विघ्नात्यन्ताभाव एव समाप्तिसाधनं प्रतिबंधकसंसर्गाभावस्यैव कार्यजनकत्वात्

ननु मंगलं विघ्नध्वंसे न कारणं गणेशस्तवपाठजन्यविघ्नध्वंसे व्यभिचारात्तत्राह मंगलमिति विजातीयविघ्नध्वंसत्वं च कार्यतावच्छेदकं न विघ्नध्वंसत्वमित्यर्थः२
ननु विघ्नध्वंस एव यदि मंगलस्य फलं तदा समाप्तिकामो न तत्र प्रवर्तेत समाप्तिसाधनत्वाभावादत आह क्वचित्त्विति विघ्नसंसर्गाभावत्वेन हेतुत्वान्न पूर्वोक्तदोषः व्यभि
चार इति भावः२

दुरितध्वंसकल्पनेतज्जनकमंगलकल्पने च गौरवादाह स्वतःसिद्धेति १ बीजत्वं समवायिकारणत्वं तच्चेश्वरे बाधितमतआह निमित्तकारणायेति २ नन्वीश्वरे नमस्काररूपमंगलाचरणमयुक्तं ईश्वरे मानाभावात् न च द्यावाभूमी जनयन्नित्यादि श्रुतिरेव प्रमाणं श्रुतीनामीश्वरोच्चरितत्वेनैव प्रामाण्यादीश्वरे सन्देहे श्रुतिप्रामाण्यस्यापि सन्दिग्धत्वादित्यत आह एतेनेति ३ कर्तृजन्यत्वाभावेन तेषां ग्रन्थादितिभावः ४ क्षितिः कर्तृजन्या शरीरजन्यत्वादिति सत्प्रतिपक्षता साध्याभावसाधकं हेत्वन्तरं यस्य सत्प्रतिपक्षः ५ अनुकूलतर्काभावेन शरीरजन्यत्वस्य सकर्तृकत्वाक्षितिरित्यर्थः ६ घटत्वपटत्वादिभेदानां तत्कार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वकल्पने लाघवं चिन्तनीयं तथा च क्षितिः सकर्तृका जन्यत्वे कार्यत्वमेव गम्यते इति कार्यभूता क्षितिः सकर्तृकैव कर्ता चेश्वर एवेति युक्तम् ७

२

क्षित्यंकुरादिकमीश्वरकर्तृकं ईश्वरातिरिक्त

इत्थंच नास्तिकादिकृतग्रन्थेषु जन्मान्तरीयमंगलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः संसारेति संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः एतेन ईश्वरे प्रमाणमपि दर्शितं भवति तथाहि क्षित्यंकुरादिकं सकर्तृजन्यं कार्यत्वात् घटवत् यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यंकुरादिकमपि न च तत्कर्तृत्वमस्मदादीनां संभवति अतस्तत्कर्तृत्वेनेश्वरसिद्धिः न च शरीरजन्यत्वेन कर्तृजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम् अप्रयोजकत्वात् अनुकर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलस्तर्कः द्यावाभूमी जनयन्देव एकः विश्वस्य गोप्ता भुवनस्य कर्ता इत्यादय आगमा अप्यनुसंधेयाः पदार्थान्विभजते द्रव्यमिति द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकं समवाय

अनुकूलतर्काभावात् हेतुस्साध्यं साधयतु

एवं चोक्तानुमानेनेश्वरसिद्धौ तदुच्चरितत्वेन वेदस्य प्रामाण्यनिश्चयाद्दोषो नेश्वरे प्रमाणमित्याह द्यावाभूमीति ८ संयोगापेक्षया कर्मेणोतिविकृतत्वं नास्तीति न्यूनत्वं मतम् ९ तन्निराकर्तुं तथेत्युक्तं यथा गुणाः पृथक्कादाचित्कास्तथा कर्मापीति भावः १ ॥ सर्गाद्यकालीनद्व्यणुकप्रयोजकं कर्म प्रयत्नजन्यं कर्मत्वात् गुरुत्ववतां पतनाभावः पतनप्रतिबन्धकप्रयत्नप्रयुक्तः धृतित्वात् ब्रह्माण्डनाशः प्रयत्नजन्यः नाशत्वात् घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिवत् वेदजन्याप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात् वेदो सांसारिकपुरुषप्रणीतः वेदत्वात् वेदपौरुषेयो वाक्यत्वात् द्व्यणुकपरिमाणजनिका संख्या अपेक्षाबुद्धिजन्या एकत्वान्यसंख्यात्वात् इत्यनुमानान्तराण्यपि साक्षात्परंपरया साधकानि बोद्धव्यानि ३

अभावोधिकरणात्मक एवेति प्राभाकरमतं तद्दूषयितुं पुनरुत्थापयति। समवाये समवायान्तरसंबंधेन सत्तावत्त्वं भावत्वं।

सर्वथा भावः पदार्थाः सप्तकीर्तिताः २ सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं ते
न भावत्वेन एषामुपन्यासो न कृतः एते च पदार्था वैशेषिके प्रसिद्धा नैयायिकानामप्य
विरुद्धाः प्रतिपादितं चैवमेव भाष्ये अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया
शक्तिसादृश्यानामतिरिक्तपदार्थत्वमाशंकितम् ननु कथमेत एव पदार्थाः शक्तिसा
दृश्यादीनामप्यतिरिक्तपदार्थत्वात् तथाहि मण्यादिसमवहिते न वह्निना दाहो न ज
न्यते तदन्येन तु जन्यते तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन
मण्याद्यपसारणेन च जन्यते इति कल्प्यते एवं सादृश्यमप्यतिरिक्तपदार्थस्तद्भिन
षट्सु भावेष्वन्तर्भवति सामान्येपि सत्त्वात् यथा गोत्वनित्यं तथाश्वत्वमपीति
सादृश्यप्रतीतेः नाप्यभावे सत्त्वेन प्रतीयमानत्वादिति चेन्न मण्याद्यभावविशिष्ट

मण्यभावादेरिति ननु यदा कदाचिन्मण्यभावविशिष्टादुत्तेजकाद्दाहोत्पत्तिः कारणतावच्छेदकतावली ह कारणाभावत्वस्यैव कार्योत्पत्तिनियामकत्वात् मण्यभावविशिष्टवह्निवह्निविशिष्टमण्य
भावो वा कारणतावच्छेदक इत्यत्र विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुतरकार्यकारणभावद्वयापत्तिरित्यत आह मण्यभावादेरिति । दाहादिकं प्रति मण्यभावस्य हेतुत्वक
ल्पनेनैव दाहरूपकार्यसंभवे । मणिसमवधानदशायां दाहवारणे । ध्वंसेति इह मणुपल्लस्यत्वं प्रतियोगिध्वंसयोः शक्तिनाशमण्योः शक्तिनाशमण्यपसारणयोश्च कार्यकारणभाव
कल्पनापि स्यादिति भावः २ प्रतिबंधकसत्त्वे कार्याजनकत्वमुत्तेजकत्वम् २

३ वह्न्यादेर्दाहादिकं प्रति मण्यभावादेरेव वा स्वातन्त्र्येण हेतुत्वं कल्प्यते अनेनैव सामञ्जस्ये
अनन्तशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् न चोत्तेजके सति प्रतिबंधकसत्त्वे
ऽपि कथं दाह इति वाच्यम् उत्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात् सादृश्यम
पि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं चन्द्रगताह्लादकत्वादिमत्त्वं
मुखे चन्द्रसादृश्यमिति द्रव्याणि विभजते क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः जोप
द्रव्याणि क्षितिः पृथ्वी आपो जलानि तेजो वह्न्यादि मरुद्वायुः व्योम आकाशं देही
आत्मा एतानि नव द्रव्याणि ननु द्रव्यत्वजातौ किं मानं न हि तत्र प्रत्यक्षं प्रमाणं घ
तैजसु प्रतीतिस्तु द्रव्यत्वावगाहादिति चेन्न कार्यसमवायिकारणतावच्छेदकतया सं
योगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिरिति

ननु चेश्वरस्य देहिनां मध्येऽनन्तर्भूतत्वात्कथं द्रव्यत्वमिति चेन्न वृद्धानां तावदेशन्यायेनेश्वरस्य शरीरमस्ति कृतिसंसाध्यदृष्टवशाच्छरीरमित्यन्ये इति वा स्वरसाद्वात्मेति ३ पृथिव्यप्ते
जोवाय्वाकाशकालदिगात्ममनांसीति पञ्चैव द्रव्याणि व्योमादेरीश्वरात्मन्येवान्तर्भावान्मनसश्चासमवेतत्वात्तेजन्तर्भावादिति नवीना आह तन्मतं निराकर्त्तुं संख्याबोधकपदं हठेनापि माह
नवेति ३ घटादिपामराणां द्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारणद्रव्यत्वजातिसिद्धिर्न भवतीति भावः २

ननु दशमं द्रव्यं तमः कुतो नोक्तं तद्धि प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात्कर्मवत्त्वाच्च द्रव्यत्वं तच्च
गंधशून्यत्वान्न पृथ्वी नीलरूपवत्त्वाच्च न जलादिकं तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारण
मिति चेन्न आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनायामन्याय्यत्वात् रूपवत्ता
प्रतीतिस्तु भ्रमरूपा एवं कर्मवत्ताप्रतीतिरपि आलोकापसरणौपाधिकी भ्रान्तैव न
च सोऽतिरिक्तत्वेन तत्र वर्णादिकल्पना गौरवं स्यात् सुवर्णस्य यथा तेजस्त्वं भावस्तथाग्रे
वक्ष्यते गुणान्विभजते अथ गुणा रूपं रसो गंधस्ततः परं स्पर्शः संख्या परिमितिः पृथक्त्वं
च ततः परं संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥ बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरु
त्वकम् द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च एते गुणाश्चतुर्विंशतिसंख्याकाः कणादे

टि तमोऽभाव एवेत्युक्तः किन्तस्यादिति तु न सम्यक् उष्णस्पर्शभास्वररूपवत्तेज इति लक्षणाया आवश्यकपदमुक्तं आदिनोत्पत्तिध्वंसपरिग्रहः ॥ रूपरसगंध
स्पर्शसंख्याप्रमाणानि पृथक्त्वसंयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नाश्च गुणा इति विभागमत्र सप्तदश कंठोक्ताः चशब्देन तत्र स्यच
शब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः समुच्चिताः तेन सर्वैकतया चतुर्विंशतिगुणा इति व्यवहृताः ॥

उत्क्षेपणादिगुणनिरूपणावसरे द्रव्यकर्मभिन्ने सामान्यभिन्ने सामान्यवति याकारणता सा किं चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानं गुणत्वजातौ मानम् ॥

शिष्ट

नकं ठतष्ठशब्देन च दर्शिताः तत्र गुणत्वजातिरंग्रेवक्ष्यते कर्माणि विभजते उत्क्षेपणमिति अर्ध्वदे

शसंयोगहेतुरुत्क्षेपणं ततो ऽपक्षेपणमाकुंचनं तथा प्रसारणं च गमनं कर्माण्येतानि पंच च ६ कर्मत्वजातिस्तु

प्रत्यक्षसिद्धा एवमुत्क्षेपणत्वादिकमपि ननु भ्रमणादिकमपि पृथक्कर्माधिकतया कुतो नो

क्तमित्यत आह भ्रमणमिति भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च तीर्यग्गमनमप्यत्र गमनादेव

लभ्यते ७ सामान्यं निरूपयति सामान्यमिति सामान्यं द्विविधं प्रोक्तं परं चापरमेव च द्र

व्यादित्रिकवृत्तिस्तु सत्तापरतयोच्यते ८ तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम् अने

कसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वे सतीति नित्यत्वे सति समवेतत्वं गगनपरिमाणा

दावप्यस्त्यत उक्तमनेकेति नित्यत्वे सत्यनेकवृत्तित्वं अत्यन्ताभावेप्यस्त्यतो वृत्तित्वसा ४

नित्यत्व शालित्वविशिष्ट एक
निष्ठप्रतियोगितानिरूपितभेद
निरूपकानुयोगितावच्छिन्नसम
वायसंबन्धावच्छिन्नाह्वितिमत्व

ध्वंसनिष्ठप्रतियोगितानिरूपितान्योन्याभावीयानुयोगिताशालित्वविशिष्टध्वंसनिरूपितप्रतियोगितावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताभाववत्वं नि
त्यत्वम्

ध्वंसनिरूपितप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगित्वे सति मनित्यत्वम्

नन्वाकाशत्वं जातावव्याप्तिः तस्या अनेकसमवेतत्वाभावादित्याशंक्य लक्षणान्तरमाह व्यक्त्यभेदरूपबाधकसत्त्वादिति शेषः अनुगतधियो जातिकल्पिकाया अभावादिति भावः एकस्यैकधर्मस्यैव सामान्यतया सर्वसिद्धे
वादेकव्यक्तेर्जातिरनुपपत्तेति भावः। व्यक्तेरिति एकव्यक्तिकत्वं गगनादेर्जातित्वे बाधकं तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं घटकलशादीनां जातीनां नावस्तुतः तुल्यव्यक्तिकत्वस्य भिन्नजातिसमनियतत्वमिति यावत् ननु जातिजातित्वबाध-
कमेवेति चेत् शंकरश्च परस्परात्यन्ताभावसमानाधिकरणयोरेकत्र समावेशः न हि तत्र यत्र भूतत्वमूर्तत्वयोर्न जातिः भूतत्वं विहाय मनसि प्रवर्तमानस्य मूर्तत्वस्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादि-
चतुष्टये सत्त्वात्। निःसामान्यत्व ... लक्षणव्याघात रूपविशेषस्य जातिमत्त्वे रूपस्य स्वतो व्यावर्तकत्वस्य हानिः तत्र जातिस्वीकारे तथैव व्यावर्तकत्वाच्च सामान्याश्रयस्य सामान्यरूपेणैव भेदसाधकत्वनियमात्
न च सामान्यरूपेण विशेषाणां भेदकत्वं सम्भवति व्यभिचारात् तादृशविषयानंगीकारे परमाणुगतैकत्वादीनां न तद्व्यक्तित्वेनैव परमाणावन्तरभेदसाधकत्वसंभवेन विशेषस्यैव पृथक्प्रसंगादिति तु त्याज्यः असंबन्धः
प्रतियोगितानुयोगितान्यतरसंबन्धेन समवायाभावः समवायाभावयोर्जातिमत्त्वमिति २

मान्यं विहाय समवेतत्वं तूक्तम् एकव्यक्तिमात्रवृत्तिस्तु जातिर्न तथा चोक्तम् व्यक्तेरभेद-
स्तुल्यत्वं शंकरोऽथानवस्थितिः रूपहानिरसंबन्धो जातिबाधकसंग्रहः द्रव्यादीति पर-
भिन्ना तु या जातिः सैवापरतयोच्यते द्रव्यत्वादिकजातिस्तु परापरतयोच्यते सत्तापेक्ष-
या व्याप्यत्वादल्पदेशवृत्तित्वात् द्रव्यत्वस्यापरत्वं परत्वमधिकदेशवृत्तित्वम् अपरत्व-
मल्पदेशवृत्तित्वम् सकलजात्यपेक्षयाधिकदेशवृत्तित्वात्सत्तायाः परत्वम् तदपेक्षया चा-
न्यासां सर्वासां जातीनामपरत्वम् व्यापकत्वात्परा स्यात् व्याप्यत्वादपरापि च १० पृथिवीत्वाद्यपेक्ष-
याव्यापकत्वादधिकदेशवृत्तित्वात् द्रव्यत्वस्य परत्वम् विशेषं निरूपयति अन्त्यो नित्यद्रव्य-
वृत्तिर्विशेषः परिकीर्तितः अन्ते वसाने वर्तते इत्यन्त्यः यदपेक्षया विशेषो नास्तीत्यर्थः

नित्यद्रव्यवृत्तिरिति विशेषाणां स्यानकथनं न तु तत्स्वरूपप्रविष्टं प्रयोजनाभावात् १

एवं च नित्यद्रव्येषु विशेषासिद्धावणुगुणानां न विशेषवत्त्वः आश्रयस्वरूपेण विशेषेणैव तेषां व्यावर्तकत्वात् आश्रयस्य विशेषवत्तया व्यावृत्तत्वेन विशेषसंभवातिति भावः। द्रव्ययोरेव संयोग इति नियमात् अत्र समवायसंबंधेन
परत्वावच्छिन्नप्रति तादात्म्यसंबंधेन तन्तुत्वेन हेतुत्वात् कार्यतावच्छेदकसंबंधविधया समवायसिद्धिः नच समवायस्याने स्वरूपसंबंधं निवेश्य कार्यकारणभावः कल्पनीय इति वाच्यं तथा च यत्समवेतं कार्यमु
त्पद्यते इत्यादि समवायिकारणव्यवस्था न स्यात् नच यत्संबद्धं कार्यमुत्पद्यते तत्समवायिकारणमित्येवास्त्विति वाच्यं कपालसंबद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वप्रसंगात् ६

समवायभिन्नत्वे सति
संबन्धत्वं स्वरूपसंब
न्धलक्षणम्

5

आदिना जातिः ५

घटादीनां द्व्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः परमाणूनां तु परस्परभेदको विशेष एव
स्वतस्तत एव व्यावृत्तः तेन तत्र विशेषान्तरापेक्षा नास्तीत्यर्थः समवायं दर्शयति घटादीनां कपालादौ
द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबंधः समवायः प्रकीर्तितः अवयवावयविनोर्जातिव्यक्त्योर्गुणगुणि
नोः क्रियाक्रियावतोर्नित्यद्रव्यविशेषयोश्च यः संबंधः स समवायः समवायत्वं नित्यसंबंधत्वं तत्र प्रमाणं तु
गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वात् दंडी पुरुष इति विशिष्टबुद्धि
वदित्यनुमानेन तेन संयोगादिबाधात्समवायसंबंधसिद्धिः नच स्वरूपसंबंधेन सिद्धसाधनं अर्थान्तरं वा
अनेकस्वरूपाणां संबंधत्वकल्पने गौरवात् लाघवादेकसमवायसिद्धिः नच समवायस्यैकत्वे वायौ रूपवत्ताबु
द्धिप्रसंगः तत्र रूपसमवायसत्त्वेपि रूपाभावात् नचैवमभावस्यापि वैशिष्ट्यं संबंधान्तरं सिद्ध्येदिति वाच्यं तस्य नित्य ५
त्वे भूतले अयुतसिद्धयोः स्वरूपसंबंध इति वदतः परस्येति शेषः तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः। विनश्यदेकमपराश्रितमेवावतिष्ठते ३ समवायसंब
ये प्रत्नानां नैयायिकानां मते अयोग्यत्वं २ प्रकृतानुपयोग्यत्वं अनुपयोगित्वमनधिकरणत्वं ३ यथा ज्ञित्यादिजनकता ये अवीला घटादिकं एवं तथा समवायीति २
स्वांश समवायरूपसमवाययोरैक्यात् २ रूपनिरूपितत्व विशिष्टसमवायनिरूपिताधिकरणतायाः स्वरूपसंबंधेनावाय्वायावभावात् पृथिव्यां गन्धस
मवायो न जले इत्यादिप्रतीतेः समवायस्य नानात्वमिति नव्याः १

अन्यथा घटशून्यदेशे घटत्वावच्छिन्नाभावस्यैकत्वात् ननु सिद्धान्तिनोऽपि मते पाकेन रक्ते घटे श्यामरूपसमवायस्य सत्त्वात् श्यामरूपवत्ताधीप्रसंग इत्यत आह ममत्विति २
ननु वैशिष्ट्यानङ्गीकारे घटाभावभूतलयोः कः संबंधः स्वरूपमिति चेत्तथा सति घटशून्यतादशायामिव घटवत्तादशायामपि भूतले घटाभावबुद्धिस्तव मतेऽपि स्यादिति घटाभावभूतलयोः स्वरूपसंबंधस्य च तत्र सत्त्वादत आह एवमिति ४

घटानयनानन्तरमपि घटाभावबुद्धिप्रसंगात् घटाभावस्य तत्र सत्त्वे तु तस्य च नित्यत्वा-
त् अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तत्र सत्त्वात् मम तु घटे पाकरक्ते
तादृशायां श्यामरूपस्य नष्टत्वान्न तद्बुद्धिः वैशिष्ट्यस्यानित्यत्वे त्वनन्तवैशिष्ट्यक-
ल्पने तवैव गौरवं एवं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबंधः अभावं
विभजते अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः अभावत्वं द्रव्यादिषट्का-
न्योन्याभाववत्त्वं संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः अन्योन्याभावस्यैकवि-
धत्वात्तद्विभागाभावात् संसर्गाभावं विभजते प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च
एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते १२ संसर्गाभावत्वं चान्योन्याभावभिन्नाभावत्वं
अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं विनाश्यभावत्वं प्रागभावत्वं जन्याभावत्वं

तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं प्रतियोगितायां विवक्षितं तेन संयोगावच्छिन्नप्रतियोगिताके संयोगाभावे नातिव्याप्तिः १ अत्र ध्वंसे अतिव्याप्तिवारणाय विनाशीति १ उत्पन्नस्य पुनरुत्पादभिया प्रागभावसिद्धिः १

ननु मास्तु घटकाले घटात्यन्ताभावबुद्धिः घटोत्पत्तेः प्राक्काले तु स्यादित्याशंक्याह अत्रेत्यादिना ननु तर्हि रक्तरूपप्रागभावाधिकरणश्यामघटे श्यामरूपध्वंसाधिकरणे च रक्तघटे कथं रक्तो नास्ति श्यामो
नास्तीति प्रतीतेः ध्वंसप्रागभावयोरधिकरणे अत्यन्ताभावस्यासत्त्वादित्यत आह ३

६ ध्वंसत्वं नित्यसंसर्गाभावत्वमत्यन्ताभावत्वं तत्र भूतलादौ घटादिकमपसारितं पुनरानी-
तं च तत्र घटकालस्य संबंधाघटकत्वादत्यन्ताभावस्य नित्यत्वेपि घटकाले तत्र घटात्यन्ताभाव-
बुद्धिः तत्रोत्पादविनाशशाली चतुर्थोयमभाव इति केचित् अत्र ध्वंसप्रागभावाधिकरणे
नात्यन्ताभाव इति प्राचां मतं श्यामघटे रक्तरूपं नास्ति रक्तघटे श्यामरूपं नास्तीति धीश्च प्राग-
भावं ध्वंसं चावगाहते न तु तदत्यन्ताभावं विरोधात् नव्यास्तु तत्र विरोधे मानाभावात् ध्वंसा-
दिकालावच्छेदेनात्यन्ताभावोवर्त्तत एवेत्याहुः नन्वस्त्वभावानामधिकरणात्मकत्वं लाघ-
वादिति चेन्न अनन्ताधिकरणात्मकत्वकल्पनापेक्षयातिरिक्तकल्पनाया एव लघीयस्त्वात्त-
त्तदिन्द्रियैः प्रत्यक्षत्वमुपपद्यते अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वादप्रत्य-
क्षत्वं स्यात् एतेन ज्ञानविशेषकालविशेषाद्यात्मकत्वमभावस्येति प्रत्युक्तं अप्रत्यक्षतापत्तेः

अभिधेयत्वमभिधाविषयत्वं संकेतग्राह्योधिकपदार्थ इति मीमांसकाः संकेतभिन्नायामभिधायां मानाभावात्संकेत एवाभिधेति नैयायिकाः ४ आदिनास्तित्वपरिग्रहः ५ अनेक
त्वं बहुत्वसंख्यावत्त्वं तच्च द्रव्ये न गुणकर्मादिषु तत्र गुणानामनंगीकारात् अपेक्षाबुद्धि[illegible]विषयत्वं बहुत्वसंख्यावत्त्वं तच्च यद्यपि समुदाये पर्याप्त्याख्यसंबंधेन वर्त्त
ते न प्रत्येकं तथापि स्वरूपसंबंधेन तद्वत्त्वं तच्च समवायेतरसाधारणत्वकृत्वमित्यतिव्याप्तिः अतोनेकत्वमेकभिन्नत्वं तच्च स्वाश्रयभेदसमानाधिकरणाभावम
तिन्नत्वमेव वक्तव्यं ६ यद्यपि भावत्वं समवायेप्यस्त्यतोनेकत्वे सति भावत्वं

व क्रं

इदानीं पदार्थानां साधर्म्यवैधर्म्ये प्रक्रमते सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते १३ स
मानो धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यं समानो धर्म इति फलितोर्थः एवं विरुद्धो धर्मो येषां
ते विधर्माणस्तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फलितोर्थः ज्ञेयत्वं ज्ञानविषयता सा च सर्वत्रैवा
स्ति ईश्वरादिज्ञानविषयतायाः केवलान्वयित्वात् एवमभिधेयत्व प्रमेयत्वादिकं बोध्यम् द्रव्या
दयः पंच भावा अनेके समवायिनः द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं सम
वायित्वं च यद्यप्यनेकत्वमभावेप्यस्ति तथाप्यनेकत्वे सति भावत्वं तथा चानेकभाववृत्तिपदार्थ
विभाजकोपाधिमत्त्वं तदर्थः तेन प्रत्येकं घटादौ नाव्याप्तिः समवायित्वं समवायसंबंधेन संबंधित्वम
नतः समवायवत्त्वं सामान्यादावभावात् सत्तावन्तस्त्रयस्त्वाद्या इति द्रव्यगुणकर्मणां सत्तावत्त्व
मित्यर्थः गुणादिर्निर्गुणः क्रियः १५ यद्यपि गुणक्रियादिशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रिया
शून्यत्वं गगनादावप्यतिव्याप्तं तथापि गुणवद्वृत्तिधर्मवत्त्वं कर्मवद्वृत्तिपदार्थविभाजकोपा
धिमत्त्वं च तदर्थः नहि घटत्वादिकं द्रव्यत्वं वा गुणवृत्ति कर्मवद्वृत्ति किं तु गुणत्वादिकं तथा

वृत्तिर्यो भिन्नान्यो भिन्नान्यतरसंबंधेन संबंधित्वम् ५
आकाशादौ च ५

वद

यद्यपीति न च गुणगुणिनोर्वा मद्दक्षिणगोविषाणयोः समानकालीनत्वात्कथं गुणशून्यत्वमिति वाच्यं निर्गुणे गुणोत्पत्तिस्वीकारे गौरवाभावात् न चैवं घटादेराद्यक्षणावच्छिन्नस्य चाक्षुषतापत्तिरिति वाच्यमिष्टापत्तेः ३

त

जात्यादीनामप्येकार्थसमवायसंबंधेन सामान्यवत्त्वात् सामान्यपरिहीना इति मूलमयुक्तमतो व्याचष्टे सामान्यानधिकरणत्वमिति तथा च सामान्यनिरूपिताधिकरणतानसामान्यादेरेकार्थसमवायस्याधिकरणता
नियामकत्वाभावादिति भावः २ सामान्यमत्र परिमाणविभाजकरूपेण बोध्यं ३ ननु द्व्यणुकपरिमाणस्य कारणत्वाभावात्तत्रातिव्याप्तिरतः पारिमाण्डल्यपदं द्व्यणुकपरिमाणस्याप्युपलक्षकं तेन तस्यापि लक्ष्यत्वमि
त्यभिप्रेत्याह अणुपरिमाणं त्विति परिमाणद्व्यणुकसाधारणमणुपरिमाणं त्वित्यर्थः ४ अणुपरिमाणं हीत्यर्थः अणुजन्यस्येति उत्कर्षाचारोरणुतरमेवेति भावः न च माणुजन्यस्याणुतरत्वमेवास्तु किं बाधक
मिति वाच्यं तथा सति त्रुटेरचाक्षुषत्वप्रसंगात् ५ आचार्याणामाशय इति कारणत्वं चान्यत्र पारिमाण्डल्यादिभ्य इति ग्रन्थे आदिपदग्राह्यपरममहत्त्वादि ग्रस्यते इत्याचार्योक्तव्याख्या आशयस्त
परममहत्त्वस्यापि विशेषगुणत्वात् सन्तन्वयव् कारणत्वं ज्ञानद्यमता नावकार्याभावेऽयत्याचार्ये एव नैव विरोधात् आचार्यमतमपि नसम्यक् ज्ञानादितराजनकत्वेन पारिमाण्डल्यादितुल्यस्य सुखदुः
खादेरजनितावयव रूपादेः पाकनेस्परमाणुरूपादेश्चागणनात् आकारणत्वस्वीकारेणासाध्येत्यादिलक्षणात्तेः ननु वक्ष्यमाण सगत पारिमाण्डल्यादीनामपि योगिप्रत्यक्षादिजनकत्वादित्यत आह इदमपीति ७

१ आकाशत्वादिकं तु न तथा उपाधिर्विभाजकोपाधिः सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः सामा
न्यानधिकरणत्वं सामान्यादीनामित्यर्थः पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् पारिमाण्ड
ल्यं अणुपरिमाणं कारणत्वं तद्भिन्नानामित्यर्थः अणुपरिमाणं तु न कस्यापि कारणं तद्धि स्वाश्रयार
ब्धद्रव्यपरिमाणारम्भकं भवेत् तच्च न संभवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात्
महतोऽपि स्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसंगात् एवं परममहत्परिमाणं अतीन्द्रियसामान्यविशेषा
श्च बोध्याः आत्ममानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेर्बोध्यं तस्यापि न
कारणत्वमित्याचार्याणामाशय इत्यन्ये तन्न ज्ञानातिरिक्तं प्रत्यकारणतायाचार्यैरुक्तत्वात् इदमपि यो
गिप्रत्यक्षे विषयस्य न कारणत्वं ज्ञायमानसामान्यं न प्रत्यासत्तिः ज्ञायमानं लिंगं नानुमितिकरणमित्यभिप्रायेणो
क्तम् ननु कारणत्वं किमत आह अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वं भवेत्तस्य
त्रैविध्यं परिकीर्तितम् १७ समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं एवं न्यायनयज्ञैस्तृतीयमु
क्तं निमित्तहेतुत्वं १८ यत्समवेतं कार्यं भवति ज्ञेयं समवायिजनकं तत् तत्रासन्नं जनकं द्वितीय

ननु तर्हि द्व्यणुकपरिमाणस्य किं जनकमिति चेत् संख्यैवेत्यवेहि व्यक्तिं विधास्यति चेदमुपरिष्टात् ७ कारणत्वं च ज्ञातत्वधर्मैतरकार्यापेक्षयेत्याचार्यमतमयः ज्ञातधर्मः ज्ञाना
दयस्तदतिरिक्तभावकार्यं प्रतिकारणत्वं पारिमाण्डल्यभिन्नानां कारणत्वमर्थः ५ ननु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वेन ज्ञायमानहेतोश्चानुमितिकरणत्वेन प
रिमाण्डल्यस्य सामान्यलक्षणाजन्यज्ञाने अनुमितौ च कारणत्वात्पारिमाण्डल्यभिन्नानामिति मूलमसंगतमत आह ६ नियतपूर्ववर्तिजातीयत्वमित्यर्थः तेनावश्यकस्य द
ण्डादेरपि स्वरूपयोग्यतासंपत्तिस्तज्जातीयत्वं च नियतपूर्ववर्तितावच्छेदकदण्डत्वादिमत्त्वमेवेति ७ यत्समवेतमिति यदवच्छिन्नस्वकारणतावच्छेदकयद्धर्मावच्छिन्ने समवायसंबंधेनोत्पद्यते
तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नसमवायिकारणमित्यर्थः घटत्वावच्छिन्नं हि स्वकारणतावच्छेदककपालत्वावच्छिन्ने समवायसंबंधेनोत्पद्यते इति भवति घटत्वावच्छिन्नं प्रति कपालत्वावच्छिन्नं समवायि
कारणं स्वकारणतावच्छेदकेत्याद्युक्त्या च न द्रव्यादेर्घटादिसमवायिकारणतावच्छेदकत्वमिति १

पघापीति तुरीतन्तुसंयोगस्य पटं प्रति कुतोऽसमवायिकारणत्वमिति न शंकनीयम् तुरीतन्तुसंयोगनाशे पटनाशापत्तेः असमवायिकारणनाशात् द्रव्यनाशजनकत्वात् यथा असमवायिकारण नाशात् द्व्यणुकनाशः २ वेगादीनामित्यादिना स्पर्शपरिग्रहः अभिघातादीत्यादिना चोदनापरिग्रहः ज्ञानादीत्यादिना इच्छापरिग्रहः इच्छादीत्यत्र प्रवृत्तेः परिग्रहः ३ तन्तुसमवेतत्वेऽसतीति तुरीतन्तुसंयोगस्यान्यत्वे सति पटसमवायिकारणपटासमवायिकारणत्वमित्यर्थः ४

मात्रं प्रापयेत् तृतीयं स्यात् तस्य कारणत्वस्यैव यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं तत्रेति समवायिकारणे प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगे पटासमवायिकारणत्वं स्यादेवं वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यादेव ज्ञानादिकमिच्छाद्यसमवायिकारणं स्यात् तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयं तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव एवं वेगादिकं वेगस्पंदाद्यसमवायिकारणं भवत्येवेति तत्रकार्यासमवायिकारणलक्षणे तद्भिन्नत्वं देयं आत्मविशेषगुणानां तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव अत्रासमवायिकारणे प्रत्यासन्नं द्विविधं कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं तत्र घटरूपे कारणं घटः तेन सह कपालरूपस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति तथा च क्वचित्समवायसंबंधेन क्वचित्स्वसमवायिसमवायसंबंधेनेति फलितोऽर्थः इदं च कार्यैकार्थ

तथा चेति द्विविधप्रत्यासत्तिर्विवक्षितेत्यर्थः २ पर्यवसितसमवायिकारणलक्षणमाह इदं चेति कार्यैकार्थप्रत्यासत्तिः समवायसंबंधः कारणैकार्थप्रत्यासत्तिः समवायिसमवेतत्वसंबंधः तथा च समवायस्वसमवायिसमवेतत्वान्यतरसंबंधेन कारणत्वे सत्यात्मविशेषगुणान्यत्वं सामान्यतोऽसमवायिकारणत्वमित्यर्थः अथ पटासमवायिकारणत्वस्य तन्तुसंयोगस्य पटरूपासमवायिकारणस्य तन्तुरूपस्य च संग्रहाय समवायस्वसमवायिसमवेतत्वयोः प्रवेशः घटरूपं प्रति घटस्यासमवायिकारणतावारणाय ताभ्यां दशान्यतरप्रत्यासत्त्यासमवायिकारणे प्रत्यासन्नत्वे सति कारणत्वे विवक्षिते तादृशान्यतरप्रत्यासत्त्या कारणत्वपर्यवसानानुधावनम् आत्मविशेषगुणान्त्वारयितुं विशेष्यभागः १ फलितोऽर्थ इति द्विविधप्रत्यासत्त्योरिति शेषः १

आन्यामिति समवायिकारणासमवायिकारणत्वमेवाकारणत्वमेव निमित्तकारणत्वं तेन तुरीसंयोगस्यासमवायिकारणत्वेपि न तस्य पटं प्रति निमित्तकारणत्वं ततिरिति २ निमित्तकारणमिति अत्रे
दं बोध्यम् समवायिकारणत्वासमवायिकारणत्वान्यकारणमेव निमित्तकारणत्वं तेन तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्यासमवायिकारणत्वेपि न तस्य पटं प्रति निमित्तकारणत्वं ततिरिति ३ येन सहपूर्वभाव इति
यद्रूपावच्छेदेत्यर्थः इत्यच तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववर्तित्वग्रह विषुवत्तावच्छेदकत्वे सति तद्धर्मावच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशून्यत्वे तद्धर्मावच्छिन्नं प्रति अन्यथासिद्धत्वं
ग्रन्थमित्यर्थः द्वितीयान्यथासिद्धं दण्डरूपादिवारणाय सत्यन्तं कपालसंयोगो घटं प्रत्येव नीत्यादि नहि कपालस्यापि तादृशविशेष्यतावच्छेदकत्वात्तत्रातिव्याप्तिवारणाय विशेष्यम् ५

8 कारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नं समवायिकारणमिति
सामान्यतो लक्षणं पर्यवसन्नं आद्यं त्यां परत्वतो यंस्यात् आद्यं त्यां समवायिकारणासमवायिकारणान्या
परं भिन्नत्वे तो ये निमित्तकारणमित्यर्थः इदानीमन्यथासिद्धत्वमेव किं यत्तदाह येन सहपूर्वभा
वः कारणमादाय वा यस्य अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् यत्कार्यं प्रति कारण
स्य पूर्ववर्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः यथा घटं प्रति दण्डत्वमिति
द्वितीयमन्यथासिद्धमाह कारणमिति यस्य स्वातंत्र्येणान्वयव्यतिरेकौ न स्तः किं तु कारणमादायैवा
न्वयव्यतिरेकौ गृह्येते तद्रूपं तदन्यथासिद्धं यथा दण्डरूपं तृतीयमाह अन्यं प्रतीति अन्यं प्रति य
पूर्ववर्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वं यथा घ
टादिकं प्रत्याकाशस्य आकाशस्य हि कारणत्वं घटादिकं प्रत्याकाशत्वेनैव स्यात् आकाशत्वं तु
शब्दसमवायिकारणत्वं अतश्च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति गृह्येत अतस्तदन्यथा
सिद्धं ननु शब्दाश्रयत्वेन तस्य कारणत्वे कान्यथासिद्धिरिति चेत्पंचमीति गरुणा अथाकाशस्य श ट

द्रा अन्यथासिद्धत्वेन तस्य कारणत्वे किमवच्छेदकमिति चेत् कपालत्वादिकं विशेषणपदार्थो वेति चतुर्थमन्यथासिद्ध
माह जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते यत्कार्यजनकं प्रति पूर्ववर्तित्वं गृहीत्वैव यस्य यत्का
र्यं प्रति पूर्ववर्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धं यथा कुलालपितुर्घटं प्रति तस्य हि कुलालपितृ
त्वेन घटं प्रति कारणत्वेऽन्यथासिद्धत्वं कुलालत्वेन रूपेण जनकत्वेति प्राप्तिः कुलालमात्रस्य घटं
प्रतिजनकत्वात् पंचममन्यथासिद्धमाह अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभा
विनः अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः अत एव प्रत्यक्षे
महत्त्वं कारणमनेकद्रव्यत्वमन्यथासिद्धम् ननु चैवैपरीत्ये किं विनिगमकमिति वाच्यं महत्त्वजा
तेः कारणतावच्छेदकत्वे लाघवात् एते पंचान्यथासिद्धा दंडत्वादिकमादिमम् घटादौ दंड
रूपादि द्वितीयमपि दर्शितम् तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः पंचमो रासभादिः
दैतेष्वावश्यकस्त्वसौ यद्यपि यद्द्रव्यं व्यक्तिं प्रति रासभस्य नियतपूर्ववर्तित्वमस्ति तथापि घ
टजातीयं प्रति सिद्धकारणभावैर्दंडादिभिरेव तद्व्यक्तेरपि संभवे रासभोऽन्यथासिद्ध इति भावः

9

६ एतेष्विति एतेषु पंचस्वन्यथासिद्धेषु मध्ये पंचमोऽन्यथासिद्ध आवश्यकः तेनैव परेषां चरितार्थत्वा
त् आहि दंडादिभिरवश्यक्लृप्तनियतपूर्ववर्त्तिभिरेव कार्यसंभवे दंडत्वादिकमन्यथासिद्धम् न
चैवं वैपरीत्ये किं विनिगमकमिति वाच्यम् दंडत्वस्य कारणत्वे दंडत्वघटितायाः परंपरायाः संबंधत्वकल्प
नेगौरवात् एवमन्येषामप्यनेनैव चरितार्थत्वं संभवति समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्
स्य सूत्रम् गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् असमवायिकारणत्वं गुणकर्मभिन्नानां
वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम् अथ वा समवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं
तदर्थः तेन ज्ञानादीनाम् समवायिकारणत्वविरहेपि नाव्याप्तिः अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहो
च्यते नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः आश्रितत्वं तु समवाया
दिसंबंधेन वृत्तिमत्त्वं विशेषणतया नित्यानामपि कालादौ वृत्तेः कालिकविशेषणतातिरिक्तस
मवायादिसंबंधेन वृत्तिमत्त्वमिति इदानीं द्रव्यस्यैव विशेष्य साधर्म्यं वक्तुमारभते क्षित्यादीनां नवानां
तु द्रव्यत्वं गुणयोगिता स्पष्टम् क्षितिर्जलं तथा तेजः पवनो मन एव च परापरत्वम् तेव

क्रियावेगाश्रया अमी २६ पृथिव्यप्तेजोवायुमनसां परत्वापरत्वं मूर्तत्वं क्रियावत्त्वं वेगवत्त्वं च साधर्म्यम्
न च यत्र वृत्त्यादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम् परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजा
तिमत्त्वस्य विवक्षितत्वात् मूर्तत्वमपकृष्टपरिमाणवत्त्वं तच्चैतेषामेव गगनादिपरिमाणस्य कुत्राप्यपकृष्टपरि
माणत्वाभावात् एवं वेगवत्कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं वेगवत्त्व इति द्रव्यत्वव्याप्यजातिम
त्त्वं च बोध्यम् कालखात्मदिशां सर्वगतत्वं परममहत् कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्तसंयोगि
त्वं परममहत्त्वं च परममहत्त्वं जातिविशेषः अपकर्षानाश्रयपरिमाणवत्त्वं वा क्षित्यादि पञ्च भूतानि
पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वं तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्व
रूपयोग्यत्वं बोध्यम् तेन ज्ञानेऽपि घट इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात् इति आत्मनि नाति
प्रसंगः अन्यथाध्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः तस्याप्ययोग्यत्वात् महत्त्वलक्षणकारणा
भावसंनिधानाच्च न प्रत्यक्षत्वं अथवा आत्मावृत्तिविशेषगुणवत्त्वं चत्वारि स्पर्शवन्ति हि पृथिव्य
प्तेजोवायूनां स्पर्शवत्त्वं द्रव्यारंभश्चतुर्षु स्यात् २७ पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारंभकत्वम्

स्वसमानाधिकरणात्यंताभावाप्रतियोगित्वंव्याप्यवृत्तित्वं तादृशाभावप्रतियोगित्वंअव्याप्यवृत्तित्वं

10

१०

नच द्रव्यानारंभकेष्वणादावव्याप्तिः द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्
व्या अव्याप्याकाशशरीरिणां अव्याप्यवृत्तिक्षणिकविशेषगुणा इष्यते आकाशात्मनामव्याप्यवृत्ति
क्षणिकविशेषगुणवत्त्वम् आकाशस्य हि विशेषगुणः शब्दः सचाव्याप्यवृत्तिः यदा किंचि
दवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात् क्षणिकत्वंच तृतीयक्षणवृत्ति
ध्वंसप्रतियोगित्वं योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात्प्रथमशब्दस्य द्वितीया
शब्देन नाशः एवं ज्ञानादीनामपि ज्ञानादिकं हि आत्मनि विभौ शरीरावच्छेदेनोत्पद्यते वृक्षा
वच्छेदेन तदभावोऽस्त्येव एवं ज्ञानादिकं क्षणद्वयस्थायि इत्यव्याप्यवृत्तिविशेषगुणवत्त्व
क्षणिकविशेषगुणवत्त्वं चार्थः पृथिव्यादौ रूपादिविशेषगुणोऽस्तीति अव्याप्यवृत्तीत्युक्तम्
पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीति विशेषगुणेत्युक्तम् नच रूपादीनामपि कांचित्तृती
यक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यम् चतुःक्षणवृ
त्तिजन्यवृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात् अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति क्षणचतु

एवं तु न किमपि ज्ञानादिकं तिष्ठति रूपादिकं तु लक्षणं चक्षुस्संयस्यापि रूपादौ वर्त्तते इति तद्व्युदासः
ईश्वरज्ञानस्य चक्षुःलक्षणावृत्तित्वात् ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तं । यद्वाकाशजीवात्मनोः साधर्म्यं त
दाजन्येति न देयं द्रव्यत्वादिकमादाय लक्षणसमन्वयात् परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थपक्षे रो
द्वित्वादीनामप्यसत्त्वेन तादृशगुणाहात्रद्वारणाय विशेषेति निर्गुणवृत्तित्वं वा वाच्यम् इच्छादि
कमादायात्मनि लक्षणसमन्वयात् रूपद्रव्यत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः पृथिव्यप्तेजसां रूपव
त्वे द्रव्यत्ववत्त्वे प्रत्यक्षविषयत्वे चेत्यर्थः नच चक्षुरादीनां भर्जकपालस्थवह्नेश्च रूपवत्त्वे
किं मानमिति वाच्यम् तत्रापि तेजस्त्वेन रूपानुमानात् एवं वाय्वानीत पृथिवीजलतेजोभागानाम
पि पृथिवीत्वादिना रूपानुमानं बोध्यम् नच घृतादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्वमव्याप्तमिति
वाच्यम् द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् घृतजलप्रभृतिषु पृथिवीषु जलेषु
द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः

11

११ नच प्रत्यक्षविषयत्वं परमाणावव्याप्तं अतिव्याप्तं च रूपादाविति वाच्यम् लौकिकचाक्षुषप्रत्यक्षवि
षयवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति गुरुणी द्वे र
सवती गुरुत्ववत्त्वे रसवत्त्वे च पृथिवीजलयोरित्यर्थः नच घ्राणेन्द्रियादीनां वायवीनां तु पार्थिवादि
नामानां च रसादिमत्त्वे किं मानमिति वाच्यम् तत्रापि पृथिवीत्वादिनानुमानात् द्वयोर्नैमित्तिको द्रवः तद्४
पृथिवीतेजसोरित्यर्थः नच नैमित्तिकद्रवत्ववत्त्वं घृतादौ वह्न्यादौ चाव्याप्तमिति वाच्यम् नैमित्तिक
द्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मनो भूतत्वमाशङ्क्य विशेषगु
णायोगिनः २९ यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ज्ञेयत्वादिकं विहायेति बोध्यम् तत्तु
नकस्यापि वैधर्म्यं केवलान्वयित्वात् स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः ३० स्पर्शाद्यष्टौ रू
पवेगौ द्रवत्वं तेजसो गुणाः ३१ रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश स्नेहहीना गन्धयुताः
क्षितावेते चतुर्दश ३२ बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा धर्माधर्मौ गुणा एते आत्मनः

स्पर्शाद्यष्टौ वेगगुरुत्वद्रवत्व

स्युःश्चतुर्दशः संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे २४ संख्यादयः पंच बुद्धिरिच्छाय
त्नोपि चेश्वरे परापरत्वे संख्यादि पंच वेगश्च मानसे ३५ वायोर्नवैकादश तेजसो गुणाज्ज
लक्षितिप्राणभृतां चतुर्दश दिक्कालयोः पंच षडेव चाम्बरे महेश्वरेष्टौ मनसस्तथैव
च ३६ ते संख्यादयः पंच खेव आकाशे साधर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं
निरूपयति तत्र क्षितिरित्यादिना तत्र क्षितिर्गंधहेतुः गंधसमवायिकारणमित्यर्थः यद्यपि
गंधवत्त्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं तथा
हि पृथिवीत्वं हि गंधसमवायिकारणतावच्छेदकतया सिध्यति अन्यथा गंधत्वा
वच्छिन्नस्याकस्मिकत्वापत्तेः नच पाषाणादौ गंधाभावाद्गंधवत्त्वमव्याप्तमिति वाच्यम्
तत्रापि गंधसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तद्भस्म
नि गंध उपलभ्यते भस्मनो हि पाषाणध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वं सिध्यति

12

१२ र्येरूपत्वं यद्द्रव्यध्वंसजन्यं तत्र द्रुपाद्यानेपाद्यमिति व्याप्तेः दृष्टं चैतत्त्वं द्विपटे महापटध्वं
सजन्ये द्रव्यं च पाषाणपरमाणोः पृथिवीत्वाज्जन्यपाषाणस्यापि पृथिवीत्वं
तपाच तस्यापि गंधवत्त्वे बाधकाभावः नानारूपवती मता शुक्लनीलादिभेदेन
नानाजातीयं रूपं पृथिव्यामेव वर्त्तते ननु जलादौ तत्र शुक्लरूपस्यैव सत्त्वात् पृथिव्यां
तु एकस्मिन्नपि धर्मिणि पाकवशेन नानारूपवत्त्वस्य संभवात् न च यत्र नानारूपं
नोत्पन्नं तत्राव्याप्तिः रूपद्वयवद्वृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्य रूपनाशवद्वृत्ति
द्रव्यत्वव्याप्यजातिमत्त्वस्य वा विवक्षितत्वात् वैशेषिकनये पृथिवीपरमाणौ रूप
नाशस्य रूपान्तरस्य च सत्त्वात् न्यायनये द्व्यणुकादावपि तत्सत्त्वात् लक्षणसमन्वयः
षड्विधस्तु रसस्तत्र ३५ मधुरकटुकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव ज
ले मधुर एव रसः अत्रापि रूपवद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणमवसेयः

गंधस्तु द्विविधो मतः द्विविध इति वस्तुस्थितिमात्रं न तु द्विविधगंधवत्त्वमपि लक्षणं क्षिति
त्वलक्षणस्य व्यर्थत्वात् द्वैविध्यं च सौरभ्यासौरभ्यभेदेन बोध्यम् स्पर्शस्तस्यास्तु विज्ञे
यो ह्यनुष्णाशीतपाकजः तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वा यावपि वक्ष्य
ते इत्युक्तं पाकज इति इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तं पाक
जस्पर्शवत्त्वमात्रं लक्षणं अधिकस्य व्यर्थत्वात् यद्यपि पाकजस्पर्शः पटादौ नास्ति
तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमित्यर्थो बोध्यः नित्यानित्या च
सा द्विधा नित्या स्यादणुलक्षणा अनित्या तु तदन्या स्यात्सैवावयवयोगिनी ३६
सा पृथिवी नित्या अनित्या चेत्यर्थः अणुलक्षणा परमाणुरूपा पृथिवी नित्या तदन्या
परमाणुभिन्ना पृथिवी द्व्यणुकादिः सर्वाप्यनित्या इत्यर्थः सैवानित्या पृथिव्येवावयव

13

भवतीत्यर्थः नन्ववयविनि किं मानं परमाणुपुंजैरेवोपपत्तेः नचपरमाणूनामतीन्द्रियत्वात्
घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यम् एकस्य परमाणोरतीन्द्रियत्वेपि तत्समूहस्य प्रत्य
क्षत्वात् यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेपि तत्समूहस्य प्रत्यक्षत्वं नचएकः स्थूलोघ
ट इति बुद्धेरनुपपत्तिरितिवाच्यं एको महान्धान्यराशिरितिवदुपपत्तेः मैवं परमाणो
रतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधान
स्य तस्यैव प्रत्यक्षत्वात् नचतदानीं दृश्यं परमाणुपुंजस्योपन्नत्वान्नप्रत्यक्षत्वे विरोध इ
तिवाच्यम् अदृश्यस्य दृश्यानुपादानत्वात् अन्यथा चक्षुरुष्मादिसंततौ कदाचिद
दृश्यत्वप्रसंगात् नचातितप्ततैलादौ कथमदृश्यदहनसंतते दृश्यदहनोत्पत्तिरिति
वाच्यम् तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरभ्युपगमात् नचादृश्ये

नद्व्यणुकेनकपंत्रसरेणोरुत्पत्तिरितिवाच्यम् यतोऽनवयवं दृश्यत्वमदृश्यत्वं वा कस्यचि
त्तद्भावाद्वाचक्ष्महे परन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवशात् दृश्यत्वं तदभावे
चादृश्यत्वं तथाच त्रसरेणोर्महत्त्वात्तस्य दृश्यत्वं न द्व्यणुकादेस्तदभावात् नहि त्व
न्मतेऽपीदं संभवति परमाणोर्महत्त्वाभावात् इत्थं चावयविसिद्धौ तेषामुत्पादविना
शयोः प्रत्यक्षसिद्धत्वादनित्यत्वं तेषां चावयवावयविधाराया अनन्तत्वे मेरुसर्षप
योरपि साम्यप्रसंगः अतः क्वचिद्विश्रामो वाच्यम् यत्र तु विश्रामस्तस्यानित्यत्वेऽ
समवेतकार्यानुत्पत्तिप्रसंगात् तस्यानित्यत्वं परममहत्परिमाणतारतम्यस्य गगना
दौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमा
णुत्वसिद्धिः नच त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम् त्रसरेणुः सावयवः चाक्षुषद्रव्य
त्वात् घटादिवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवाः महदवयव

महद्द्रव्यारंभकत्वात्

१४ त्वात्कपालवदित्यनुमानेनतदवयवसिद्धेः नचेदमप्रयोजकम् अपकृष्टमहत्त्वप्रति
अनेकद्रव्यत्वस्यप्रयोजकत्वात् नचैवंक्रमेणानन्तावयवधारापिस्यादितिवाच्यम्
अनवस्थाभयेनतदसिद्धेरिति साचत्रिधाभवेद्देहमिंद्रियंविषयसंज्ञका साका
र्यरूपापृथिवीत्रिधाशरीरेंद्रियविषयभेदादित्यर्थः तत्रदेहमुदाहरति योनिजा
दिर्भवेद्देहः योनिजमयोनिजंचेत्यर्थः योनिजमपिद्विविधंजरायुजमंडजंच जरा
युजंमानुषादीनां अण्डजंसर्पादीनां अयोनिजं स्वेदजोद्भिज्जादिकं स्वेदजाः कृ
मिदंशाद्याः उद्भिज्जास्तृणगुल्माद्याः नारकिणांशरीरमप्ययोनिजं नचमानुषा
दिशरीराणांपार्थिवत्वेकिंमानमितिवाच्यम् गंधादिमत्त्वस्यैवप्रमाणत्वात् नचक्ले
दोष्मादेरुपलंभात्आप्यत्वादिकमपिस्यादितिवाच्यम् तथासतिजलत्वपृथिवी

त्वादिना संकरप्रसंगात् न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यम् क्ले
दादीनां विनाशेपि शरीरत्वेन प्रत्यभिज्ञानात् गंधाद्युपलब्धेश्च पृथिवीत्वसिद्धेः तेन
पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यं शरीरत्वं न जाति पृथिवीत्वादिना
सांकर्यात् किंतु चेष्टाश्रयत्वं वृक्षादीनामपि चेष्टासत्त्वान्नाव्याप्तिः न च वृक्षादीनां शरीर
त्वे किं मानमिति वाच्यम् आध्यात्मिकवायुसंबंधस्य प्रमाणत्वात् तत्रैव किं मानमिति चे व
त् भग्नक्षतसंरोहणादिना तदुन्नयनात् यदि हस्तादौ शरीरव्यवहारो न भवति तदाऽ
न्त्यावयवित्वेन तद्विशेषणीयं न च यत्र शरीरे चेष्टा न जाता तत्राव्याप्तिरिति वाच्यम् ता
दृशे प्रमाणाभावात् अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं अ
न्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत्र मानुषेचैत्रत्वादिजातिमादाय
त

चेष्टाहिताहितप्राप्ति
परिहारानुकू
लक्रिया नतु
स्पंदनमात्रं
तेन घटादौ नाति
व्याप्तिः ॥१॥

15

१५ लक्षणासमन्वयः नचनृसिंहशरीरैकदेशं नलक्षणासमन्वयः तत्र नृसिंहस्यैक
त्वेन जातिमत्त्वाभावात् जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति
वाच्यम् कल्पभेदेन नृसिंहशरीरस्यैव नानात्वेन नृसिंहत्वजात्यालक्षणासमन्वयात्
इन्द्रियं घ्राणलक्षणम् घ्राणेन्द्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथमिति चेत् इयं घ्रा
णेन्द्रियं पार्थिवं रूपादिषु मध्ये गंधस्यैवाभिव्यञ्जकत्वात् कुंकुमगंधाभिव्यञ्जकघृता न
दिवत् नचदृष्टान्ते स्वीयरूपादिव्यञ्जकत्वात् सिद्धिरिति वाच्यम् परकीयरूपाद्यव्यञ्ज भि २
कत्वस्य तदर्थत्वात् नचनवशरावगंधव्यञ्जकजलेनानैकान्तिकमिति वाच्यम् तस्य स
क्तुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयम् वायूपनीतसुरभिभागस्य दृष्टान्त
त्वसंभवात् नच घ्राणेन्द्रियसन्निकर्षस्य गंधमात्रव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यम् १५

सरवद्: स्वान्यतर
विषयक: साक्षात्कारो भोगः

द्रव्यत्वे सति विशेषगुणात् विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः उपभोगसा
धनं हि विषयः सर्वमेव हि कार्यजातमदृष्टाधीनं यच्च कार्यं यददृष्टाधीनं तत्तदुपभोगं
साक्षात्परम्परया वा जनयत्येव नहि बीजप्रयोजनाभ्यां विना कस्यचिदुपपत्तिरस्ति ते
न द्व्यणुकादिब्रह्माण्डान्तं सर्वमेव विषयः शरीरेन्द्रिययोर्विषयत्वेपि प्रकारान्तरेणोपन्यासः
शिष्यबुद्धिवैशद्यार्थः जलं निरूपयति वर्णः शुक्लः स्नेहसमवायिकारणतावच्छेदक
तया जलत्वजातिः सिध्यति यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं त
थापि जन्यस्नेहत्वं बोध्यम् अथ परमाणौ जलत्वं न स्यात्तत्र जन्यस्नेहाभावात् तस्य च
नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेन्न जन्यस्नेहजनकतावच्छेदका
तया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः

16

१६ शुक्लरूपमेव जलस्येति दर्शयितुमुक्तम् वर्णः शुक्ल इति ननु शुक्लरूपवत्त्वं लक्षणम्
अस्तु वा नैमित्तिकद्रवत्ववद्वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् अभास्व
नार शुक्लेतररूपासमोधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः तेन
स्फटिकादौ नातिव्याप्तिः रसस्पर्शौ जले मधुरशीतलौ जलस्य मधुर एव रसः शीत एव
स्पर्शः तिक्तरसवद्वृत्तिमधुररसवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम् मधुररसवत्त्व
स्यार्थः शीतेतरस्पर्शवद्वृत्तिशीतस्पर्शवद्वृत्तिजातिमत्त्वं चार्थः॰ नच शुक्लरूपमेवेति
कुतः कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न नीलजनकतावच्छेदकायाः पृथि
वीत्वजातेरभावात् जले नीलरूपासंभवात् कालिन्दीजले नीलत्वप्रतीतिस्तु आश्र
ये॰पाधिकी भ्रान्तिः अत एव वियति विक्षेपे धवलिमोपलब्धिः अथ जले माधुर्यं किम
नम्र १६

तेन शङ्खादौ ना
व्याप्तिः ४
द्रव्यत्व साक्षाद्व्याप्य ४

नहि प्रत्यक्षेण कोपि रसस्तत्रानुभूयते न च नारिकेलजलादौ माधुर्यमुपलभ्य
त एवेति वाच्यम् तस्याश्रयोपाधिकत्वात् अन्यथा जंबीरजलादावम्लोपलब्धेर
म्लादिमत्त्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसाभिव्यंजकत्वात् न
च हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यम् कल्पनागौरवात् पृ
थिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिकम् जंबीरजलादौ त्वाश्रयो
पाधिकी तथा प्रतीतिः एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वं तदव
च्छिन्नजनकतावच्छेदकं जलत्वं बोध्यम् एतेन चन्दनादौ शैत्योपलब्धिश्चन्दना
न्तर्वर्त्तिशीततरसलिलस्यैव तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव
तत्र पाकासंभवात् स्नेहस्तु घृतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः जलस्य

17

१९ स्नेहसमवायिकारणत्वात् तेन जलेएव स्नेह इति मन्तव्यम् द्रवत्वं तु सांसिद्धिकमुदा
तं२ हृतम् सांसिद्धिकद्रवत्वं जातिविशेषः नदवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः
तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति नित्यतादि
प्रक्रमवत् पृथिव्या इवेत्यर्थः जलं द्विविधं नित्यमनित्यं च परमाणुरूपं नित्यं द्व्य
णुकादि सर्वमनित्यम् अवयवसमवेतं च अनित्यमपि त्रिविधं शरीरेन्द्रियविषयभे
दात् पृथिवीतो योविशेषस्तमाह किन्तु देहमयोनिजम् जलीयशरीरमयोनिज
मेवेत्यर्थः तच्च वरुणलोके प्रसिद्धम् इन्द्रियं रसनम् जलीयमित्यर्थः तथाहि रस
नं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् रसन
सन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम् विषयं दर्शयति सिन्धुहिमादिविषयो १७
मतः

सिन्धुः समुद्रः हिमं तुषारः आदिपदात्सरित्कासारकरकाद्युपादयः सर्वैर्ग्राह्याः
न च हिमकरकयोः कठिनत्वात्पार्थिवत्वमिति वाच्यम् ऊष्मणा विलीनयोस्तयो
र्जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादे
यत्वसिद्धेः अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकायां काठिन्यप्रत्ययस्य भ्रा
न्तत्वात् तेजो निरूपयति स्पर्श उष्णस्तेजसस्तु स्यात् उष्णत्वं स्पर्शनिष्ठो जातिवि
शेषः प्रत्यक्षसिद्धः इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जा
तिविशेषः तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसंधेयं न चोष्णस्पर्शवत्त्वं चेद्दकि
रणादावव्याप्तमिति वाच्यम् तत्राप्युष्णस्य सत्त्वात् किन्तु तदन्तःपातिजलस्पर्शे

१८ स्याभिभवादग्रहः एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वाद
ग्रहः रूपं शुक्लभास्वरम् वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभ
वाच्छुक्लरूपाग्रहः तद्रूपाग्रहे धर्मिग्रहोपि चाक्षुषत्वं न स्यादिति चेन्न अन्यदीयरू
पेणैव धर्मिग्रहसंभवात् शंखस्यैव पित्तपीतिम्नावह्नेस्तु शुक्लरूपं नाभिभूतं
किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये नैमित्तिकं द्रवत्वं तु सुवर्णादिरूपे तेजसि त
त्सत्वात् न च नैमित्तिकं द्रवत्वं दहनादावव्याप्तं घृतादावतिव्याप्तमिति वाच्यम् ए
पि व्यवृत्तिनैमित्तिकद्रवत्ववद्वृत्तिजातिमत्त्वस्य विवक्षितत्वात् नित्यतादि च पूर्ववत् ज
लस्यैवेत्यर्थः तथा हि तद्द्विविधं नित्यमनित्यं च परमाणुरूपं नित्यं तदन्यदनित्यम् १८

ग्रवयविच तच्चत्रेधा शरीरेंद्रियविषयभेदात् शरीरमयोनिजमेवेति तच्चसूर्य्यलो
कादौ प्रसिद्धम् अत्रयोविशेषस्तमाह इंद्रियंनयनम् चक्षुस्तैजसं परकीयस्पर्शा
व्यंजकत्वेसतिपरकीयरूपव्यंजकत्वात्प्रदीपवत् प्रदीपस्यस्वीयस्पर्शव्यञ्जकत्वादा
द्यंपरकीयेति घटादेःस्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणायद्वितीयंपरकीयेति
ग्र घवाप्रनायादस्ञानत्वसंभवादाद्यंपरकीयेतिनदेयं चक्षुःसन्निकर्षव्यभिचारवा
रणाय द्रव्यत्वंदेयम् विषयंदर्शयति वह्निसुवर्णादिविषयोमतः ननुसुवर्णस्यतैजस
त्वेकिंमानमितिचेन्न सुवर्णंतैजसम् असतिप्रतिबंधकेऽत्यन्तानलसंयोगेप्यनुच्छि
द्यमानद्रववत्वात् यन्नैवंतन्नैवंयथापृथिवी नचाप्रयोजकं पृथिवीद्रवत्वस्यजलद्रवत्व

अनुकूलतर्कस्येध्या
विपक्षबाधको व्याप्तिपरिशोधकश्च

19

साध्याभाव वृत्तित्वं व्यभिचार

स्य चाग्निसंयोगनाश्यत्वात् ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तेन व्य
भिचार इति चेन्न जलमध्यस्य मसीद्रोदवत्तस्याद्रवत्वात् अपरे तु पीतिमाश्रयस्यात्यंत
वह्निसंयोगेपि हर्वरूपापरावृत्तिदर्शनात्प्रतिबंधके विजातीयद्रव वत् द्रव्यं कल्प्यते अग्नि
संयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः अत्यन्ताग्निसं
योगेपि हर्वरूप विजातीयरूपानभिव्यक्तरत्वात् तप्तजलमध्यस्य पीतपटवत् तस्य च
पृथिवीजलभिन्नस्य तेजस्त्वनियमात् वायुं निरूपयति अपाकजोनुष्णाशीतस्प
र्शस्तु पवने मतः ४२ अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकज इति अ
पाकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीत इति एतेन वायवीयो विजातीयः

स्पर्शादिलिंगकः वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते विजातीयस्पर्शेन विलक्षणशब्देन
तृणादीनां धृत्या शाखादीनां कंपेन च वायोरनुमानात् यथा च वायुर्न प्रत्यक्षस्तथाग्रे व
क्ष्यते एवं वह्निस्पर्शतायुत्क्रमः वायुर्हि द्विधा नित्योऽनित्यश्च परमाणुरूपो नित्यस्तद
न्योऽनित्यः समवेतश्च सोऽपि त्रिविधः शरीरेंद्रियविषयभेदात् तत्र शरीरमयोनिजं पिशा
चादीनां परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभागोपष्टंभादुपभोगक्षमत्वम्
जलादीनां प्राधान्याज्जलीयत्वादिकमिति अत्र यो विशेषस्तमाह देहव्यापित्वगिंद्रियं
शरीरव्यापि स्पर्शग्राहकमिंद्रियं त्वक् तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाभिव्यंजक
त्वात् अंगसंगिसलिलशैत्याभिव्यंजकव्यजनवायुवत् विषयं दर्शयति प्राणादि

स्तुमहावायुर्वृधनोविषयोमतः यद्यप्यनित्योवायुश्चतुर्विधः तस्यचतुर्थीविद्या प्रा
णादिरित्युक्रमाकरेत यद्यप्यत्रसंक्षेपान्नैविध्यमुक्तं प्राणास्त्वेकएव हृदादिनाना
स्थानवशान्मुखनिर्गमादिनानाक्रियाभेदवशाच्चनानासंज्ञांलभत इति आकाशं
निरूपयति आकाशस्यतुविज्ञेयः शब्दोवैशेषिकोगुणः ४४ आकाशकालदि
शामेकव्यक्तित्वादाकाशत्वादिकंनजातिः किन्तु आकाशत्वंशब्दाश्रयत्वं वैशेषिक इ
तिकथनन्तु विशेषगुणान्तरव्यवच्छेदाय एतेनप्रमाणमपिदर्शितंतथाहि शब्दोगु
णः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् शब्दोद्रव्य समवेतो
गुणत्वादित्यनुमानेनशब्दस्यद्रव्यसमवेतत्वेसिद्धे शब्दोनस्पर्शवद्विशेषगुणः

अग्निसंयोगासमवायिकारणत्वाभावेसति अकारणगुणपूर्वकप्रत्यक्षत्वात्सुखवत् पा
कजरूपादौव्यभिचारवारणायसत्यन्तं पटरूपादौव्यभिचारवारणायाकारणगुण
पूर्वकेति जलपरमाणुरूपादौव्यभिचारवारणायप्रत्यक्षेति नदिक्कालमनोगुणाः विशे
षगुणत्वात्सुखवत् नात्मविशेषगुणाः बहिरिंद्रिययोग्यत्वात् रूपवत् इत्थंच शब्दाधि
करणं नवमंद्रव्यं गगननामकंसिध्यति नचवाय्ववयवेषुसूक्ष्मशब्दक्रमेणवायौकार
णगुणपूर्वकःशब्द उत्पद्यतामितिवाच्यम् अपावत् द्रव्यत्वाविच्छिन्नवायुविशेषगुण
स्याभावात् तत्रचशरीरस्यविषयस्यचाभावात् इंद्रियंदर्शयति इंद्रियंचनवेष्कोत्रम्
ननुआकाशलाघवादेकंसिद्धं श्रोत्रंपुरुषभेदाद्भिन्नंकथमाकाशंस्यादत आह

51

२१ एकः सन्नप्युपाधितः आकाश एकः सन्नप्युपाधेः कर्णशष्कुल्यादिभेदाद्भिन्नं श्रो
त्रात्मकं भवतीत्यर्थः कालं निरूपयति जन्यानां जनकः कालः तत्र प्रमाणं दर्शयितु
माह जगतामाश्रयो मतः ४५ तथा हि इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पंदादि
कं यदि विषयीकरोति तदा सूर्यपरिस्पन्दादिना घटादेः संबंधो वाच्यः स च संयोगादिर्न संभ
वतीति काल एव तत्संबंधघटकः कल्प्यते इत्थं च तस्याश्रयत्वं सिद्धं सम्यक् प्रमाणांत
रं दर्शयति परापरत्वधीहेतुः परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव परत्वा
परत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादिति विभुः ^ कल्प्यते इति भावः नन्वेक काल एकः २
स्य कालस्य सिद्धौ क्षणादिनमासवर्षादिसमयभेदो न स्यादित्यत आह क्षणादिः स्यादुपाधि
तः

कालस्त्वेकोप्युपाधिभेदात्क्षणादिव्यवहारविषयः उपाधिस्तु क्रियाजन्यविभागप्रा गं
गभावावच्छिन्नं कर्म पूर्वसंयोगावच्छिन्नविभागो वा पूर्वसंयोगनाशावच्छिन्नउत्तरसं
योगप्रागभावो वा उत्तरसंयोगावच्छिन्नंकमेवा नचोत्तरसंयोगानन्तरंक्षणव्यवहारो
नस्यादितिवाच्यम् कर्मान्तरसत्त्वात् महाप्रलये क्षणादिव्यवहारोय ध्वंस्तितदा
नापत्त्याध्वंसेनैवोपपादनीयः दिनादिव्यवहारस्तु तत्क्षणकूटैरिति दिशं निरूपयति
दूरान्तिकादिधीहेतुरेकानित्यादिगुच्यते ॥ ६ ॥ दूरत्वमन्तिकत्वं दैशिकंपरत्वमपर
त्वंवोच्यंतद्धेतुरसाधारणंबीजंदिगेव ।दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्र
यतयासिद्धिकुसिद्ध्यतीतिभावः नन्वेकैवदिग्यदितदाप्राचीप्रतीच्यादिव्यवहारःकथमत्य

ख्यतामत आह उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् यत्पुरुषस्योदयगिरिसंनि
हिता या दिक् सा तत्पुरुषस्य प्राची एवमुदयगिरिव्यवहिता प्रतीची एवं तत्पुरुषस्य
मेरुसंनिहिता दिगुदीची सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थित इति नियमात् आत्मा
नं निरूपयति आत्मेन्द्रियाद्यधिष्ठाता आत्मत्वजातिः सुखदुःखादिसमवायिकार
णतावच्छेदकतया सिध्यति ईश्वरेपि सा जातिरस्त्यदृष्टादिकारणाभावान्न सुखाद्यु
त्पत्तिः नित्यस्य स्वरूपयोग्यस्य फलावश्यंभाव इत्यस्याप्रयोजकत्वात् अपरे तु
ईश्वरे जातिर्नास्त्येव प्रमाणाभावात् न च दशमद्रव्यत्वापत्तिः ज्ञानवत्त्वेन विभजनादि
त्याहुः इन्द्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः यद्यप्यात्मनि अहं जाने सुखी २२

त्वादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रधानत एव शरीरादिभिन्न स्व
प्रतीतिगोचर इति प्रतिपादयितुं न शक्यते इत्यतः प्रमाणान्तरं दर्शयति करणं हि सक
र्तृकम् वास्यादौ नीच्छिदादिकरणानां कर्तारमन्तरेण फलानुपधानं दृष्टं एवं चक्षुरा
दीनां ज्ञानकरणानामपि फलोपधानं नोपपद्यते इत्यतिरिक्तः कर्ता कल्प्यते ननु
शरीरस्यैव कर्तृत्वमस्तु तत्राह शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः न च चैतन्यं ज्ञा
नादिकमेव मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः प्राणाभावेन
ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकितस्य स्थविरेण स्म
रणानुपपत्तेः शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् न च सर्वशरीरे

23

त्वन्नसंस्कारेणाद्वितीयशरीरे संस्कार उत्पद्यत इति वाच्यम् अनन्तसंस्कारकल्पने गौरवा
त् किंच शरीरस्य चैतन्ये बालकस्य स्तनपाने प्रवृत्तिर्न स्यात् इष्टसाधनताज्ञानस्य तद्धे
तुत्वात् तदानीमिष्टसाधनत्वानुभावकाभावात् मन्मते तु जन्मान्तरानुभूते इष्टसाधन
त्वस्य तदाभी स्मरणादेव प्रवृत्तिः तस्माज्जन्मान्तरानुभूतं स्मर्यते न च जन्मान्तरानु
भूतमन्यदपि स्मर्यतेति वाच्यम् उद्बोधकाभावात् संस्कारनाशाद्वा अत्र तु जीवना
न्यथोपपत्त्या जीवनादृष्टस्योद्बोधकत्वकल्पनात् एवं पूर्वजन्मस्यापि तस्य पूर्वजन्मांतरा
नुभूतं स्मर्यते इत्थं चानादित्वसिद्धौ अनादिभावस्य नाशानुपपत्तेः तन्नित्यत्वं सिद्ध्यति इ
न्द्रियाणां कर्तृत्वं करणत्वं चेति मतं निरस्यति तथात्वे चेदिंद्रियाणामुपघाते कथं स्मृतिः चेत २३

नत्वमित्यर्थः उपाध्यानेनाशो वा एवं चक्षुषानुभूतस्य स्मरणं न स्यादित्यर्थः अनुभवयितु
रभावात् अन्येनानुभूतस्य अन्येन स्मरणायोगात् अभेवस्मरणयोः सामानाधिकरण्येन न
कार्यकारणभावादिति भावः ननु मनसो नित्यत्वाच्चैतन्यमस्त्वित्यत आह मनोपि न तथा ज्ञा
नाद्यनुपलब्धेर्न तथा भवेत् तथा मनश्चेतनं मनसश्चैतन्ये ज्ञानादिकं प्रत्यक्षं न स्यात् मनसोणु
ध्यमत्वात् प्रत्यक्षे महत्त्वस्य हेतुत्वात् मनसि ज्ञानसुखादिसत्वे न तत्प्रत्यक्षत्वानुपपत्तेरित्यर्थः
यथा मनसोणुत्वं तथाग्रे वक्ष्यते नन्वस्तु विज्ञानमेवात्मा तस्य स्वतः प्रकाशत्वाच्चेतनत्वं ज्ञा रूप
नसुखादिकं तु तस्यैवाकारविशेषः तस्यापि भावत्वादेव क्षणिकत्वं एवं पूर्वपूर्वविज्ञानस्योत्तरो
त्तरविज्ञानहेतुत्वात् सुषुप्तावप्यालयविज्ञानधारा निराबाधैव मृगमदवासनायावसनइव

-25

एवं पूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति
चेन्न तस्य जगद्विषयकत्वे सार्वज्ञ्यापत्तेः यत्किंचिद्विषयत्वे विनिगमनाविरहः लघुत्वाद
पि विषयावच्छास प्रसंगश्च तदानीं निराकारचित्संततिरनुवर्त्तेत इति चेन्न तस्याः प्रकाशते शानत्वे ३
प्रमाणाभावात् अन्यथा घटादेरपि ज्ञानत्वापत्तिः न चेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनो ना
वादिति वाच्यम् घटादेरनुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेष एवायं विज्ञा
नस्येति चेन्न किमयमाकारोतिरिच्यते विज्ञानात् तर्हि समायातं विज्ञानव्यतिरिक्तेन नाति
रिच्यते चेत्तर्हि समूहालंबने नीलाकारोपि पीताकारः स्यात् स्वरूपतो विज्ञानस्याविशेषात्
अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न अपोहरूपत्वेपि नीलत्वादीनां विरुद्धानामे २४

कस्मिन्नसमावेशात् इतरथाविरोधावधारणस्यदुरुपपादत्वात् नचावासनासंक्रमः संभवति
मातृपुत्रयोरपिवासनासंक्रमप्रसंगात् नचोपादानोपादेयभावोनियामक इतिवाच्यम् वा
सनायाःसंक्रमोसंभवात् उत्तरस्मिन्नुपपत्तिरेवसंक्रम इतिचेन्न तदुत्पादकाभावात् चितांशे
वोत्पादकत्वेतदानन्त्यप्रसंगः क्षणिकविज्ञानेत्वतिशयविशेषः कल्प्यते इतिचेन्न मानाभावात्
कल्पनागौरवाच्च एतेनक्षणिकशरीरेष्वेव चैतन्यमित्यपि प्रत्युक्तंगौरवात् अतिशयेमा
नाभावाच्च बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वाक
ल्पनात् अस्तुतर्हिक्षणिकविज्ञानेगौरवात् नित्यविज्ञानमेवात्मा अविनाशीवा अरे अ
यमात्मासत्यंज्ञानमनन्तंब्रह्मेत्यादिश्रुतेश्चेन्न तस्यसविषयकत्वासंभवस्यदर्शितत्वात्

निर्विषयस्य ज्ञानत्वे मानाभावात् सविषयकत्वस्याप्यननुभवाच्च अतो ज्ञानभिन्नो नित्य आ
त्मेति सिद्धम् सत्यं ज्ञानमिति ब्रह्मपरं जीवे तु नोपयुज्यते ज्ञानाज्ञान सुखित्वासुखित्वा
दिभिर्जीवानां भेदसिद्धेः एतेन मोक्षे परस्परं भेदः अन्यथा बंधमोक्षानुपपत्तेः योपीश्वरा
भेदबोधको वेदः तदभेदेन तदीयत्वं प्रतिपादयन् स्तौति अभेदभावनयैव ज्ञातव्यमि
ति वदति अत एव सर्वे एवात्मानः समर्पिता इति श्रूयते मोक्षदशायामज्ञाननिवृत्तावभे
दो जायते इत्यपि न भेदस्य नित्यत्वेन नाशायोगात् भेदनाशेपि व्यक्तिद्वयं स्यादस्त्येव न
च द्वित्वमपि नश्यतीति वाच्यम् तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेपि सत्यस्वरूपं तद्वदित्यवत्
द्वित्वाभावेपि व्यक्तिद्वयात्मकौ तावित्यस्य सुवचत्वात् मिथ्यात्वाभावाधिकरणात्मकत्व २५

त्वसत्यत्वमितिचेत् एकत्वाभावो द्व्यात्मको द्वित्वमित्यस्यानुपपन्नत्वात् प्रत्येकमेकत्वेसत्येपि
पृथिवीजलयोर्नगंधद्रववदुभयंनैकमित्यस्य सर्वजनसिद्धत्वात् योपितदानीमभेदबोध
कआगमः सोपिनिर्दुःखत्वादिनासाम्यंप्रतिपादयति संपदाधिक्येपुरोहितोयंराजासंवृत्त इ
तिवत् अतएवनिरंजनः परमंसाम्यमुपैतीतिश्रूयते इष्यतेपिनज्ञानसुखात्मकः
किंतुज्ञानाद्याश्रयः नित्यविज्ञानमानंदंब्रह्मेत्यादौ विज्ञानपदेनज्ञानाद्याश्रयएवोक्तः
यः सर्वज्ञः ससर्वविदित्याद्यनुरोधात् आनंदमित्यस्याप्यानंदवदित्यर्थोऽर्शआदि
त्वान्मत्वर्थीयोच्प्रत्ययादन्यथापुंलिंगत्वापत्तेः आनंदोपिदुःखाभावेउपचर्यते भाराप
पगमेसुखीसंवृत्तोहमितिवत् अस्तुवातस्मिन्नानंदोऽस्रसुखमिति श्रुतेः नविद्यतेसु

26

संबंधस्येति कुतो नार्थ इति चेन्न क्लिष्टकल्पनापत्तेः प्रकरणविरोधाच्च आनंदमित्यत्र म
त्वर्थीयो च प्रत्ययविरोधादिति संक्षेपः एतेन प्रकृतिः कर्त्री पुरुषस्तु पुष्करपलाशवन्नि
र्लेपः किन्तु चेतनः कार्यकारणयोरभेदात् कार्यनाशे कार्यरूपतया नाशो माभूदित्यका
रणत्वं बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनं बुद्धिश्च प्रकृतेः परिणामः सैव
महत्तत्त्वमन्तःकरणमित्युच्यते तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ तस्याश्चेंद्रियप्रणा
लिकया परिणतिर्ज्ञानरूपा घटादिना संबंधः पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमा
नश्च भेदाग्रहात् ममेदं कर्तव्यमित्यत्र निर्देशमंदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतन
प्रतिबिंबादतात्त्विको दर्पणस्येव मुखोपरागः इदमिति विषयोपरागइंद्रियप्रणालिकया २६

परिणतिभेदस्तात्त्विको निःश्वासात्मिहतदर्पणस्येव मालिन्निमा कर्त्तव्यमितिक्वावारांशस्ते
नांशात्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यात्मात्त्विकः संबंधो दर्पणमालिन्निम्नेवमस्व
स्योपलब्धिरित्युच्यते ज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्ना अपि बुद्धेरेव कृतिसामानाधिक
रण्येन प्रतीतेः नच बुद्धिश्चेतनापरिणामित्वादिति मतमपास्तं कृत्यदृष्टभोगानामिव चैत
न्यस्यापि सामानाधिकरण्यप्रतीतेः तद्भिन्ने मानाभावाच्च चेतनोहंकरोमीति प्रतीतेः

परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् कृत्यंशेपि किं नेष्यते अन्यथा बुद्धेर्नित्यत्वे मो कर्तृचेतनयोर्भेदे उ
क्षाभावो नित्यत्वे तत्स्वभावस्य संसाराणपत्तिः अचेतनायाः प्रकृतेः कार्यत्वाद्बुद्धेरचेतनत्वं का

चेतनेति कार्याभावात् २ र्यकारणयोरभेदादिति चेन्न असिद्धेः कर्तुर्जन्यत्वे मानाभावात् वीतरागजन्मादर्शना
दनादित्वसिद्धेः अनादेर्नाशासंभवात् नित्यत्वे तत् किं प्रकृत्यादिकल्पनेन नच प्रकृतेः कि

यमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन वि
रोध इति वाच्यम् प्रकृतेरदृष्टस्य गुणैरदृष्टजन्यैर्गुणैरिच्छादिभिः कर्ताहमेवेति तद्व्या
त् तत्रैवं सति कर्तारमात्मानं केवलं तु य इत्यादि वदता भगवता हि प्रकटीकृतोयमुपरिष्टा
द्गाथाय इति संक्षेपः धर्माधर्माश्रयोध्यक्ष इति आत्मेत्यनुवर्ज्यते शरीरस्य तदाश्रयत्वे
देहान्तरकृतकर्मणां देहान्तरे भोगानुपपत्तेः विशेषगुणयोगतः योग्य विशेषगुणसंबं
धात्मनः प्रत्यक्षं न त्वन्यथा अहं जाने करोमीत्यादि प्रतीतेः प्रवृत्त्याद्यनुमेयोयमिति
अयमात्मा परदेहादौ प्रवृत्त्यादिनानुमीयते प्रवृत्तिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहे
नावस्थोक्तत्वात् (ाय) चेष्टायाः प्रयत्नसाध्यत्वाच्चेष्टया प्रयत्नवानात्मानुमीयते तत्र दृष्टान्तमाह
रथगत्येव सारथिः ॥५॥ यथा परिदृष्टकर्मण चेष्टा न धापितेन कर्मणा सारथिरथस्यानुमीयते तथा २७

शरीरस्य न चैतन्यमित्यादौ २

चेष्टात्मकेन कर्मणा परात्मापीति भावः अहंकारस्याश्रयोऽयमिति अहंकाराश्रय अहमिति
धीः तद्विषय आत्मा न शरीरादिः मनोमात्रस्य गोचरः ५२ मनोभिन्नेन्द्रियाग्राह्योऽमनो
ग्राह्य इत्यर्थः रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् विभुरिति विभुत्वं परममहत्त्वं तच्च
पूर्वमुक्तमपि स्पष्टार्थमुक्तम् बुद्ध्यादिगुणवान् बुद्धिः सुख दुःखेच्छादयश्चतुर्दश
गुणाः पूर्वमुक्ता वेदितव्याः अत्रैव प्रसंगात् बुद्धेः प्रपंचं दर्शयति बुद्धिस्तु द्विविधा मता
नु द्वैविध्यं व्युत्पादयति अनुभूतिः स्मृतिश्च स्यात् अनुभूतिश्चतुर्विधा ५३ प्रत्यक्षमप्यनुमिति
स्तथोपमितिः शाब्दजे एतासां च तस्य करणानि चत्वारि प्रत्यक्षानुमानोपमानशब्दाः
प्रमाणानीति सूत्रोक्तानि वेदितव्यानि तत्रेन्द्रियजन्यं ज्ञानं प्रत्यक्षं यद्यपि मनोरूपेन्द्रिय
जन्यं सर्वमेव ज्ञानं तथापीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति शि

वच्छितम् ईश्वरप्रत्यक्षं तु न लक्ष्यं इन्द्रियार्थसन्निकर्षोत्पन्नम् अव्यपदेश्यमव्यभिचारिव्यवसा
यात्मकं प्रत्यक्षमिति सूत्रेण तथैवोक्तत्वात् अथवा ज्ञानाकरणकं प्रत्यक्षम् अनुमितौ व्याप्ति
ज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे अनुभवस्य करणत्वान्न
तत्रातिव्याप्तिः इदं लक्षणमीश्वरप्रत्यक्षे साधारणं परामर्शजन्यं ज्ञानमनुमितिः यद्यपि पर
मर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यं हेतुविषयकज्ञानमनुमितिः न
च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम् तादृशज्ञानवृत्त्यनुभवत्वव्याप्य
जातिमत्त्वस्य विवक्षितत्वात् अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः एवं सादृश्यज्ञा
नकरणकं ज्ञानमुपमितिः पदज्ञानकरणकं ज्ञानं शाब्दबोधः वस्तुतो यत्किंचित्प्रत्यक्षव्य
क्तिं गृहीत्वा तद्व्यक्तिवृत्त्यनुमित्यवृत्तिमत्त्वं प्रत्यक्षं एवमनुमितित्वादिकम् निर्वाच्यमिति

(जन्य) प्रत्यक्षाणि विभजते घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रोत्रं मा
नसमिति षड्विधं प्रत्यक्षम् न चेश्वरप्रत्यक्षस्यैव विभजनानर्हत्वं जन्यप्रत्यक्षस्यैव निरूपणीयत्वात्
उक्तसूत्रानुसारात् घ्राणस्य गोचरो गंधो गंधत्वादिरपि स्मृतः गोचर इति ग्राह्य इत्यर्थः गंधत्वा
दिरित्यादिपदात् सुरभित्वादिपरिग्रहः गंधस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा गंधाश्रयग्र
हणे तु घ्राणस्यासामर्थ्यमिति बोध्यम् तथा रसो रसज्ञायास्तथा शब्दोपि च श्रुतेः रसत्वादि
सहित इत्यर्थः तथा शब्दत्वादिसहितः गंधो रसश्चोद्भूतो बोध्यः उद्भूतरूपं नयनस्य गोचरो द्रव्या
णि तद्वन्ति पृथक्त्वसंख्ये विभागसंयोगपरत्वापरत्वे स्नेहो द्रवत्वं परिमाणयुक्तम् क्रियाजातिर्योग्य
वृत्तिः समवायश्च तादृशाः ग्रीष्मोष्मादावनुद्भूतरूपमिति ननत्प्रत्यक्षं तन द्वन्ति उद्भूतरूपवन्ति
योग्येति पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तिर्बोध्यम् तादृशयोग्यव्यक्तिवृत्तिः चक्षुर्योग्यत्वमेव क
थं तदाह गृह्णाति चक्षुः संबंधादालोकोद्भूतरूपयोः आलोकसंयोगः उद्भूतरूपं च चाक्षुषप्रत्यक्षे

कारणं तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसंबंधेन कारणत्वं द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयस-
मवायसंबंधेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति उद्भू-
तस्पर्शवत्त्वं द्रव्यगोचरः सोपि च त्वचः सोपि उद्भूतस्पर्शोपि स्पर्शत्वादिसहितः रूपान्यच्च चक्षुषो योग्य
रूपमत्रापि कारणम् ५६ रूपान्यच्चेति रूपभिन्नं रूपत्वादिभिन्नं च चक्षुषो योग्यं तत्त्वगिन्द्रि-
यस्यापि ग्राह्यम् तथा च एकत्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ताः एवं क्रिया एवं जातयो योग्य-
वृत्तयश्च त्वचो ग्राह्या इति अत्रापि त्वगिन्द्रियजन्येपि द्रव्यप्रत्यक्षे रूपं कारणम् तथा च बहिरि-
न्द्रियजन्यद्रव्यप्रत्यक्षे रूपं नवीनास्तु बहिर्द्रव्यप्रत्यक्षत्वेन रूपं कारणं प्रमाणाभावात् किन्तु चाक्षु-
षप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणम् अन्वयव्यतिरेकात् "बहिरिन्द्रियजन्यद्रव्यप्रत्य-
क्षमात्रे किं कारणमिति चेन्न किंचिदात्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु रूपस्य
कारणत्वे लाघवमिति चेन्न वायोस्त्वगिन्द्रियेणाग्रहणप्रसंगात् इष्टापत्तिरिति चेत् उद्भूतस्पर्श २९

एवं लाघवात् कारणमस्तु प्रत्ययाख्यप्रत्यक्षत्वे त्वि ... प्राप्तिरित्येव किं न स्यात् तस्मादिमं
पश्यामीति वत्वायुं स्पृशामीति प्रत्ययस्य चाक्षुषयोरपि प्रत्यक्षत्वं जन्यत्वेव वहिर्द्रव्यप्रत्यक्षे
मात्रे तु न रूपस्य न वा स्पर्शस्य हेतुत्वं वायुप्रभयोरेकतरस्य तत एव क्वचित् हि लादिकमपि
क्वचित्संख्यापरिमाणाग्रहणाद्दृष्टादित्याकुः इन्द्रियाश्च हेतत्वचोर्योगो मनसो ज्ञानकारणम्
त्वचोर्योग इति त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले
त्वचं परिहृत्य पुरीतति वर्त्तमाने न मनसा ज्ञानाजननमिति ननु सुषुप्तिकाले किं ज्ञानं भवि
ष्यति अनुभवरूपं वा स्मरणरूपं वा नाद्यः अनुभवसामग्र्यभावात् न चाक्षि प्रत्यक्षे चक्षु
रादिना सह मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षम् ज्ञानादेरभावा
देव न मानसम् ज्ञानाद्यभावे चात्मनोपि न प्रत्यक्षमिति व्याप्तिज्ञानाभावादेव नानुमितिः
सादृश्यज्ञानाभावान्नोपमितिः पदज्ञानाभावान्न शाब्दबोध इत्यनुभवसामग्र्यभावा

ग्राह्यत्वः उद्बोधकाभावान्न स्मरणम् मेवं सुषुप्तिप्राक्कालेऽप्यन्ते क्वादिव्यक्ते त्वक्संबंधेनात्ममनस्स
प्रत्यक्षप्रसंगात् तदतीन्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायते
इत्यत्रापि प्रमाणाभावात् अपरे ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रसनचाक्षु
षादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात् विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात् प
रस्परप्रतिबंधादेकमपि वा न स्यादिति अत्र केचित्तु वौक्तयुक्त्या त्वङ्मनो योगस्य हेतुत्वे सि
द्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्व मनुत्तवानुरोधात्कल्प्यते इति अन्ये तु सु
षुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञाने हेतुत्वे वैकल्प्यं चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयो
गाभावान्न त्वाचप्रत्यक्षमिति मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥६॥ मनोज
न्यप्रत्यक्षविषयमित्यर्थः मतिर्ज्ञानं कृतिः प्रयत्नः एवं सुखत्वादिकमपि मनोग्राह्यम्
एवमात्मापि मनोग्राह्यः किंतु मनोमात्रस्य गोचर इत्यनेन पूर्वोक्तत्वादत्र नोक्तम् ३०

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादि
विशिष्टज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषणज्ञान
स्य कारणत्वात् तस्माच्च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्वि
कल्पकं तच्च न प्रत्यक्षम् तथाहि वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं
जानामीति प्रत्ययात् तत्रात्मनि ज्ञानं प्रकारीभूय भासते तत्र घटस्तत्र घटत्वं प्रकारो ज्ञाने घटे
यः स एव विशेषणमित्युच्यते विशेषणीय हि विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते
विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं निर्विकल्पके च घटत्वादि
कं न प्रकारः तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यज्ञानं ज्ञाने न भवति घटत्वाद्यप्रका
रकं च घटादिविशिष्टज्ञानेन संभवति ज्ञात्यतिरिक्ते [illegible] यदा येज्ञानस्य यत्किंचिद्धर्मप्र
कारकत्वनियमात् महत्त्वं षड्विधे हेतुः इति द्रव्यप्रत्यक्षे महत्त्वं समवायसंबन्धेन कारणम्

द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन कारणम् द्रव्यसमवेतसम
वेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति इंद्रियमिति
अत्रापि च ... न्द्रिय इत्यनुषज्यते इंद्रियत्वं न जातिः पृथिवीत्वादिना संकरप्रसंगात् किन्तु
शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् आत्मादिवा
रणाय सत्यन्तम् उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छब्देतरेति विशेषगुणस्वरूपादेश्चक्षु
रादावप्यसत्त्वादुद्भूतेति तच्च संयोगादावप्यस्ति तथा च शब्देतरोद्भूतगुणाः संयोगादिस्तद्वत्त्वादावप्य
स्यतो विशेषेति कालादिवारणाय विशेष्यदलम् इंद्रियावयवविषयसंयोगस्यापि प्राचाम्
ते प्रत्यक्षजनकत्वादिंद्रियावयववारणाय कालादौ रूपाभावप्रत्यक्षे संनिकर्षघटकतया कारणी
भूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःपदम् ज्ञानकारणमित्यपि तद्वारणाय क
रणमतम् ५१ असाधारणं कारणं करणम् असाधारणत्वं च ... व्यापारवत्त्वम् व्यापारः संनि
कर्षः षड्विधं संनिकर्षमुदाहरणद्वारा दर्शयति विषयेंद्रियसंबंधो व्यापारः सोपि षड्विधः

द्रव्यग्रहणस्तु संयोगात्संयुक्तसमवायतः ५८ द्रव्येषु समवेतानां तथा तत्समवायतः तत्रापि समवे
तानां शब्दस्य समवायतः ५९ तद्वृत्तीनां तु समवेतसमवायेन तु ग्रहः विशेषणतया तद्वदभा
वानां ग्रहो भवेत् ६० द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम् द्रव्यसमवेतप्रत्यक्षमिन्द्रियसं
युक्तसमवायजन्यम् एवमग्रेपि वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणं
द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसं
युक्तसमवेतसमवायः एवमन्यत्रापि विशिष्यैव कार्यकारणभावः परन्तु पृथिवीपरमा
णुनीले नीलत्वम् पृथिवीपरमाणौ च पृथिवीत्वं चक्षुषा कथं न गृह्यते तत्र परम्परया
उद्भूतरूपस्य महत्त्वस्य च सत्त्वात् तथाहि नीलत्वं जातिरेकैव परमाणुनीले घटनीले
च वर्तते तथा च महत्त्वसंबंधो नीलघटमादाय वर्तते रूपसंबंधस्तु उभयमादायैव वर्त
ते एवं पृथिवीत्वेपि घटादिकमादाय महत्त्वसंबंधो बोध्यः एवं वायौ तदीयस्पर्शादौ च

सत्तायाश्चाक्षुषप्रत्यक्षं स्यात् तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवा
यस्य द्रव्यसमवेतप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतप्रत्यक्षे
कारणत्वं इति वाच्यम् इत्थं च परमाणुनीलादौ च नीलत्वाद्यग्रहः परमाणुचक्षुःसंयोग
स्य महत्त्वावच्छिन्नत्वाभावात् एवं वाय्वादौ न सत्तादिचाक्षुषम् तत्र चक्षुःसंयोगस्य रूपा
वच्छिन्नत्वाभावात् एवं यत्र घटस्य एकदेशावच्छेदेनालोकसंयोगः चक्षुःसंयोगस्त्वपरावच्छे
देन तत्र घटप्रत्यक्षत्वाभावात् आलोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं बोध्यम्
एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः
द्रव्यसमवेतसमवेतप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः रसप्रत्यक्षे रसनसंयुक्तसम
वायः अत्रापि महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववद्बोध्यम् एवं गन्धप्रत्यक्षे
घ्राणसंयुक्तसमवायः रसप्रत्यक्षे रसनसंयुक्तसमवायः गन्धसमवेतस्य घ्राणजप्रत्यक्षे ३२

घ्राणसंयुक्तसमवेतसमवायः रसत्वसमवेतस्य रासनप्रत्यक्षे रसनसंयुक्तसमवेतसमवायः कारणं
शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवा
यः अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम् वक्ष्यमाणमलौकिकप्रत्यक्षमिन्द्रियसंयोगादिकं विनापि
भवति एवमात्मप्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः आत्मसम ज्ञानादिषु
ज्ञानत्वादिषु वेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम् अभावप्रत्यक्षे समवायप्रत्यक्षे
चेन्द्रियसंबद्धविशेषणताहेतुः वैशेषिकमते तु समवायो न प्रत्यक्षः अत्र यद्यपीन्द्रियसंबद्धविशे
षणता नानाविधा तथापि यथा च भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते संख्या
दौ च रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतवि
या शेषणतया शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसम
वेतविशेषणतया. कत्वादौ खत्वाद्यभाव श्रोत्रावच्छिन्नसमवेतविशेषणतया एवं कत्वावच्छिन्नाभा

समवेत

33

भावेरूपत्वाभावादिकं विशेषणविशेषणतया घटाभावादौ घटाभावः संयुक्तविशेषणविशेषणत
या एवमन्यत्राप्यूह्यम् तथापि विशेषणतावैलक्षण्यं कैव सा गण्यते अन्यथा घ्राणेन्द्रियसंनिकर्षेऽतिप्र
संगः वायोरप्याघ्राणत्वेन यद्विन्द्रियादुपलभ्यते तेनैव तत्र प्रसज्यते ॥ अभावप्रत्यक्षे योग्यानुपलब्धिः कारणं
तथाहि भूतलादौ घटादिज्ञाने जाते घटाभावादिकं न ज्ञायते तेनाभावोपलम्भे प्रतियोग्युपलम्भा
भावः कारणम् तत्र योग्यतापि चापेक्षिता सा च प्रतियोगिसत्त्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा त
द्यथा प्रतियोगिनो घटादेः सत्त्वप्रसंजनया प्रसंजितः उपलम्भाभावः प्रतियोगी यस्य स उपलम्भाभा
वोऽभावप्रत्यक्षे हेतुः तथाहि यत्रालोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्या
द्यापादयितुं शक्यते तच्च घटाभावादिप्रत्यक्षं भवति अंधकारे नापादयितुं शक्यते तेन न घटाभा
वादेरंधकारे चाक्षुषप्रत्यक्षम् स्पार्शनप्रत्यक्षं तु भवत्येव आलोकसंबंधं विनापि स्पार्शनप्रत्य
क्षस्यापादयितुं शक्यत्वात् गुरुत्वादिकं यदयोग्यं तदभावस्तु न प्रत्यक्षः तत्र गुरुत्वादिप्रत्यक्ष

स्यापादयितुमशक्यत्वात् वायावुद्भूतरूपाभावः पाषाणे सौरभाभावः वह्नावनुष्णाभावः गु
डे तिक्ताभावः श्रोत्रे शब्दाभावः आत्मनि सुखाद्यभावः एवमादयस्तु तत्तदिंद्रियैर्गृह्य
न्ते तत्रान्यत्र तु स्थापादयितुमशक्यत्वात्संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता अन्योन्या
भावप्रत्यक्षे त्वधिकरणयोग्यत्वमपेक्षितम् अत स्तम्भादौ पिशाचादिभेदोपि चक्षुषा गृह्यते
एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं बोध्यम् अत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा उक्ताः
अलौकिकसन्निकर्षास्त्विदानीमुच्यते अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ६१ व्यापारः
सन्निकर्षः सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा सामान्यलक्षणायस्येत्यर्थः तत्र लक्षण
पदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते तच्चेंद्रियसंबद्धवि
शेष्यकज्ञाने प्रकारीभूतं बोध्यम् तथाहि यत्रेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति
ज्ञानं जातं तत्र ज्ञाने धूमत्वं प्रकारस्तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवंरूपं सकलधूमविषय

35

कं ज्ञानं जायते अत्र यदीन्द्रियसंबद्धमेवेत्युच्यते तदा धूलिपटले धूमत्वमानत्वं सकलधू
मविशेष्यकं ज्ञानं न स्यात् तत्र धूमत्वेन सहेन्द्रियसंबन्धाभावात् मन्मते तु इन्द्रियसंबद्धधूलि
पटलं तद्विशेष्यकं धूम इति ज्ञानम् तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः इन्द्रियसंबंधस्य
लौकिकोऽग्राह्यः इदं च बहिरिन्द्रियस्थले मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं सन्निकर्षः
एवं तु समानानां भावः सामान्यम् तच्च क्वचिन्नित्यं धूमत्वादि क्वचिज्जातिसपक्षादिः यत्रैको
घटः संयोगसंबंधेन भूतले समवायसंबंधेन कपाले वा ज्ञातस्तदनन्तरं च सर्वे यातद्घटव
तां भूतलादीनां कपालानां वा ज्ञानं भवति तत्रेदं बोध्यम् परन्तु सामान्यं येन संबंधेन ज्ञायते
तेन संबंधेनाधिकरणानां प्रत्यासत्तिः किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं एवं चेत्यर्थः
ज्ञातम् तत्र सर्वे यातद्घटवतां ज्ञानं न स्यात् सामान्यस्य तदानीमभावात् किं चेन्द्रियसंब
द्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रियसंबंधं विनापि तादृशज्ञानप्रकारीभू ३४

न सामान्यसत्त्वात् सकलघटविषयकं ज्ञानं कुतो न जन्यते तस्मात्सामान्यज्ञानं प्रत्यासत्तिः न
तु सामान्यमित्याह आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते तथा च सामान्यलक्षण
इत्यत्र लक्षणशब्दस्य विषयोऽर्थः तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरितीह लभ्यते
ननु चक्षुःसंयोगादिकं विनापि यत्र सामान्यज्ञानं वर्त्तते तत्र सकलघटादीनां प्रत्यक्षं स्यादत आह
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षिते ॥६२॥ अस्यार्थः यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं
जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञानसामग्री अपेक्षिता सा च
सामग्री चक्षुःसंयोगालोकसंयोगादिकं तेनान्धकारादौ चक्षुरादिना तादृशज्ञानं न जन्यते ननु
ज्ञानलक्षणाप्रत्यासत्तिर्ज्ञानरूपा यदि सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यादत
आह विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः सामान्यज्ञानप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानल
क्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति अत्रायमर्थः प्रत्यक्षे सन्निकर्षं

35

विना भानं न संभवति तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकल
वह्नीनां च भानं कथं भवतु तदर्थं सामान्यलक्षणा स्वीक्रियते न च सकलधूमवह्निभाना
भावे का क्षतिरिति वाच्यम् प्रत्यक्षधूमे वह्निसंबंधस्य गृहीतत्वादन्यधूमस्य चानुपस्थित
त्वाद्धूमो वह्निव्याप्यो नवेति संशयानुपपत्तेः मन्मते तु सामान्यलक्षणया सकलधूमो
पस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसंदेहः संभवति न च सामान्यलक्ष
णास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यतापत्तिरिति वाच्यम् प्रमेयत्वेन सकल
ज्ञाने जातेपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् एवं ज्ञानलक्षणायाश्च स्वी
कारे सुरभिचन्दनमिति ज्ञाने सौरभस्य ज्ञानं कथं स्यात् यद्यपि सामान्यलक्षणयापि सौ
रभस्य ज्ञानं संभवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया एवं यत्र धूमत्वेन धूली
पटलं ज्ञातं तत्र धूलीपटलस्य भ्रान्तव्यवसाये भानं ज्ञानलक्षणया ॥॥ ३५

योगिनो द्विविधाः प्रोक्ताः युक्तयुञ्जानभेदतः युक्तस्य सर्वदा ज्ञानं चिन्तासहकृतोऽपरः
योगिनो द्विविधाः प्रोक्ताः युञ्जानाश्चातो योगजधर्मस्यापि द्वैविध्यम् युक्तस्य तावद्योग
जधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवि
तुमर्हति द्वितीयस्य चिन्ताविशेषोऽपि सहकारी इति प्रत्यक्षखण्डः समाप्तः अनुमितिं व्यु
त्पादयति व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ६६ अनुमायां ज्ञायमानं लिङ्गं
तु करणं न हि अनुमायामनुमितौ व्याप्तिज्ञानं करणम् परामर्शो व्यापारः तथाहि येन
पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित्पर्वतादौ अन
वच्छिन्नमूलां धूमलेखामभ्रंलिहां पश्यति तदनन्तरं च धूमो वह्निव्याप्य इति एवं रू
पं व्याप्तिस्मरणं तस्य भवति पश्चाच्च वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं भवति स एव
परामर्श इत्युच्यते तदनन्तरं पर्वतोऽयं वह्निमानिति ज्ञानं जायते तदेवानुमितिः अत्र प्रा

36

चीनां तु व्याप्यत्वेन ज्ञायमानं धूमादिकं लिंगमनुमितिकरणं वदन्ति तन्न दूषयति ज्ञा
यमानमिति लिंगस्यानुमित्यकरणत्वे युक्तिमाह अनागतादिलिंगेन न स्यादनुमि
तिस्तदा ६१ यद्यनुमितौ लिंगं करणं स्यात्तदानागतेन विनष्टेन वा लिंगेनानुमितिर्न स्यात्
अनुमितिकरणस्य लिंगस्य तदानीमभावादिति व्याप्यस्य पक्षधर्मतेति धीः परामर्श उच्यते
व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितौ जनकं तच्च व्याप्यः प
क्ष इति ज्ञानं पक्षो व्याप्यवानिति ज्ञानं वा अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात्पक्षे सा
ध्यमित्याकारिका पक्षो व्याप्यवानिति ज्ञानात्पक्षः साध्यवानित्याकारिका द्विवि
धादपि परामर्शात्पक्षः साध्यवानित्येवानुमितिरित्यन्ये ननु वह्निव्याप्यधूमवा
न्पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्म
रणं तत्र ज्ञानद्वयादेवानुमितिदर्शनाद्व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं ३६

किंतु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वम् आवश्यकत्वात् विशिष्ट
ज्ञानकल्पने गौरवाच्चेति चेन्न व्याप्यतावच्छेदकाज्ञाने वह्निव्याप्यवानिति ज्ञानादनुमित्यु
त्पत्तेः लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानहेतुत्वं किंच धूमवान्पर्वत इति ज्ञा
नादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात् न च धूमत्वं
ना गृहीतमात्रव्याप्यवच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वं वाच्यम् चैत्रस्य व्याप्तिग्रहे
मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यात् यदि तत्पुरुषीयगृहीतमात्रव्याप्यवच्छेदकप्रकारक ना
तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदानन्तकार्यकारणभावः
मन्मते तु समवायसंबंधेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसंबंधेनानुमितिं जनय
त्येवेति नानन्तकार्यकारणभावः यदि च व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतंत्र
कारणमित्युच्यते तदा कार्यकारणभावद्वयं वह्निव्याप्यधूमस्यालोकवान्पर्वत इति ज्ञानाद

37

प्यनुमितिः स्यादिति इत्थं च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयम् फलमुखगौरवस्यादो
षत्वादिति व्याख्यानाम व्याप्त्याश्रयः तत्र व्याप्तिः केत्यत आह व्याप्तिः साध्यवदन्यस्मिन्नसंबंध
उदाहृतः ५६ वह्निमान्धूमादित्यादौ साध्यं वह्निः साध्यवान्महानसादिः तदन्यो जलह्रदादिः
तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः येन संबंधेन साध्यं धूमवान्वह्नेरित्यादौ साध्यवद
न्यस्मिन्नयःपिंडादौ वह्नेः सत्त्वान्नातिव्याप्तिः यत्र येन संबंधेन साध्यं तेनैव साध्यवान्बोध्यः ^
[illegible] समवायसम्बन्धेन वह्निमान्वह्न्यवयवः तदन्यो महानसादिः तत्र धूमस्य विद्यमा
नत्वादव्याप्तिप्रसंगात् साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान्बोध्यः तेन पर्वतः किंचिद्व^
ह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेपि न क्षतिः येन संबंधेन हेतुता तेनैव संबंधेन साध्यव
दन्यावृत्तित्वं बोध्यं तेन वह्निमदन्यस्मिन्धूमावयवे धूमस्य समवायसंबंधेन सत्त्वेपि न क्षतिः सा
ध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वावच्छिन्नाभावो बोध्यः तेन धूमवान्वह्नेरित्यादौ साध्यव ३७

प्रतियोगिताका

दन्यवृत्तादि्वृत्तित्वाभावेऽपि नातिव्याप्तिः अयोगोलकादौ सत्त्वात् अत्र यद्यपि द्रव्यं गुण क
र्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन्नवृत्ता
दावव्याप्तिर्नास्ति तथापि हेतुतावच्छेदकरूपेणावृत्तित्वं वाच्यम् प्रकृते च विशिष्टस
त्तात्वस्य हेतुतावच्छेदकत्वान्नाव्याप्तिः तथा च हेतुतावच्छेदकं साध्यवदन्यवृत्तितानवच्छेदक
मिति फलितोऽर्थः ननु केवलान्वयिनि ज्ञेयत्वादौ साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः किंच
दौ सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्ये हेतुतावच्छेदकसंबंधेन समवायेन वृत्तेरप्र
सिद्धत्वादव्याप्तिरत आह अथवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधि
करण्यं व्याप्तिरुच्यते हेतुमतिनिष्ठावृत्तिर्यस्य स तथा विरहोऽभावः तथा च हेत्वधिकरण
वृत्तिर्योऽभावस्तदप्रतियोगिना साध्येन हेतोः सामानाधिकरण्यं व्याप्तिः अत्र यद्यपि वह्नि
मान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेरस्तीत्यव्याप्तिः
साध्यवत्ववन्निष्ठात्यन्ताभावाप्रतियोगिसाध्येन हेतोः सामानाधिकरण्यं व्याप्तिः

ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकैताभावविरोध्यसंभवान्नाव्याप्तिरित्यत आह २ यावन्तो यत्प्रतीतिजन्यप्रतीति
वाच्यमिति गुणत्वस्य द्रव्यत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वान्नाव्याप्तिरिति भावः ३ विषयतम् व्यासज्यधर्मत्वम्

नच समानाधिकरणावच्छिन्नगुणयोरेवाव्याप्तिरिति वाच्यम् तत्र द्वित्वरूपव्यासज्याभावसत्त्वादेक
सत्त्वेपि द्वयं नास्तीति प्रतीतेः गुणत्वावच्छिन्नवत्त्वादित्यादावव्याप्तिश्च तथापि साध्यतावच्छेद
कप्रतियोगितानवच्छेदके तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरिति वाच्यम् तथाच
हेतुमन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकमिति सिद्धम् ननु रूपत्व
व्याप्यजातिमत्त्वात् पृथिवीत्वादित्यादौ साध्यतावच्छेदिका रूपत्वव्याप्यजातयस्तासां च शु
क्लत्वादिरूपजातीनां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति
चेन्न तत्र परंपरया रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः तथाच रूपत्वव्याप्यजातेर
भावप्रतियोगितावच्छेदकत्वेपि जातिमत्त्वस्य प्रतियोगितावच्छेदकत्वाभावान्नाव्याप्तिः
एवं दण्डिमान्दण्डिसंयोगादित्यादावपि दण्डादेः साध्ये परंपरासंबन्धेन दण्डत्वादिकमेव साध्य
तावच्छेदकमतो नाव्याप्तिः साध्यादिभेदेन व्याप्तिभेदात् तादृशस्थले साध्यतावच्छेदक ३८
रूपत्वव्याप्यजातिमत्त्वस्यैव साध्यतावच्छेदकत्वात् नहि तादृशधर्मावच्छिन्नाभा
वः क्वापि पृथिव्यामस्ति ४ त्रुटिः स्वाश्रयसमवायेन स्वजातित्वं तदाश्रयो जातिः स्वत्र समवायो जातेः शुक्लादिः ६

तावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येवलक्षणघटकमित्यपिवदन्ति
हेत्वधिकरणंहेतुतावच्छेदकविशिष्टाधिकरणंवाच्यम् तेनद्रव्यंगुणकर्मान्यत्ववि
शिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणनिष्ठाभावप्रतियोगित्वे द्रव्यत्वस्यनाव्या
प्तिः हेतुतावच्छेदकसंबंधेनहेत्वधिकरणंबोध्यम् तेनसमवायसंबंधेनधूमाधिक
रणतदवयववृत्तिसाभावप्रतियोगित्वेपिवह्नेर्नाव्याप्तिः अभावस्यप्रतियोग्यनधिक
रणंबोध्यः तेनकपिसंयोगीएतद्वृक्षत्वादित्यत्रमूलावच्छेदेन एतद्वृक्षवृत्तिकपिसं
योगाभावप्रतियोगित्वेपि कपिसंयोगस्यनाव्याप्तिः नचप्रतियोग्यधिकरणत्वे
यदिप्रतियोग्यनधिकरणवृत्तित्वं तदातत्रैवाव्याप्तिः प्रतियोगिनः कपिसंयोग
स्यानधिकरणेगुणादौयोवर्त्तते ऽभावस्तस्यैववृक्षे मूलावच्छेदेनसत्त्वात् यदिप्र
तियोग्यनधिकरणवृत्तित्वं तदासंयोगीसत्त्वादित्यादावतिव्याप्तिः सत्ताधिकरण

गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम् । हेत्वधिक
रणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात् । स्वप्रतियोग्यनधिकरणी
भूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः । प्रतियोग्यनधिकरणं च प्रतियोगितावच्छे
दकावच्छिन्नानधिकरणं बोध्यम् । तेन विशिष्टसत्तावाञ्जातेरित्यादौ जात्यधिकरणे गु
णादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेऽपि न क्षतिः । अत्र च साध्यतावच्छेद
कसंबंधेन प्रतियोग्यनधिकरणत्वं बोध्यम् । तेन ज्ञानवानात्मत्वादित्यादौ सत्ताधिकर
णघटादेर्विषयतासंबंधेन ज्ञानाधिकरणत्वेऽपि न क्षतिः । इत्थं च वह्निमान्धूमादि
त्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वेऽपि न क्षतिः । ननु प्रतियोगितावच्छेदका
वच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वं तत्सामान्यस्य वा यत्किंचित्प्रतियोगितावा-
च्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितम् । आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्राव्या २९

प्तिः कपिसंयोगाभाववत्यपि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिरपि कपिसंयोगोऽभ
वृति तदनधिकरणं च वृक्ष इति द्वितीयेन तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः सर्व
रा स्यैवाभावस्य पूर्वं वृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् न
पूर्वक्षणवृत्तित्वविशिष्ट ४ च वह्निमान् धूमादित्यादौ घटाभावादेः स्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्व
तादेः तथापि साध्यतावच्छेदकसंबंधेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रति
योगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यम् घटाभावे यावदभावत्वस्य घटाभावात्मक
तया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादीति क्रमेण प्रतियोगिव्यधि व्या ३
करणस्याप्रसिद्धत्वात् यदि तु घटाभावादौ वह्न्यभावादिभिन्न इत्युच्यते तथापि धूमा
ञौवान्वह्न्यभावादित्यादावव्याप्तिः तत्र साध्यतावच्छेदकसंबंधः स्वरूपसंबंधः तेन संबंधेन
सर्वस्यैवाभावस्य पूर्वं क्षणावृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिक

रणत्वेति न तीयेन कपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिः तत्रात्मवृत्तिकपिसंयो
गाभावाभावः कपिसंयोगस्तस्य च गुणत्वात् प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि
तदवच्छिन्नानधिकरणत्वं च हेत्वधिकरणस्यात्मन इति मैवम् यादृशप्रतियोगितावच्छेदकाव
च्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् ननु का
लो घटवान्कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरण
स्य महाकालस्य जगदाधारतया सर्वेषामेवाभावानां साध्यतावच्छेदकसंबंधेन कालिक
विशेषणतया प्रतियोग्यधिकरणत्वात् अत्र केचित् महाकालभेदविशिष्टघटाभा
वस्तत्र प्रतियोगिव्यधिकरणो महाकालस्य घटाधारत्वेपि महाकालभेदविशिष्टघटा
नाधारत्वात् महाकाले महाकालभेदाभावात् वस्तुतस्तु प्रतियोगितावच्छेदकसं
बंधेन प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्ये य
त्संबंधावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य तद्धेतु ४०

व्यापकत्वं बोध्यम् । यः संबंधः साध्यतावच्छेदकसंबंधः यद्धर्मः साध्यतावच्छेदकः तत्र यदि यद्
संबंधावच्छिन्नत्वाभावमात्रमुच्यते तदा समवायेन ज्ञानवत्त्वाभावत्वस्य प्रतियोगितावच्छेदक
संबंधः समवायः तेन प्रतियोग्यनधिकरणात्मवृत्तित्वात् सपवनत्प्रतियोगितावच्छेदक
च वह्नित्वमित्यव्याप्तिः स्यात् । यदि च यत्संबंधावच्छिन्नत्वाभावमात्रमुच्यते तदा तादृशसंयो
योगेन घटाभावस्य प्रतियोगितायाः संयोगसंबंधावच्छिन्नत्वसत्त्वाद् व्याप्तिः स्यादत उभय
मुपात्तम् । व्यापकत्वमानाधिकरण्यान्वयाश्रितत्वं च कालो घटवान् कालपरिमाणादित्यादौ संयो
गसंबंधेन घटाभावप्रतियोगिनो घटस्यानधिकरणे हि तदधिकरणे महाकाले वर्तमानः
स एव संयोगेन घटाभावस्य प्रतियोगितायाः कालिकसंबंधावच्छिन्नत्वे घटत्वावच्छिन्नत्वो
भयाभावस्य सत्त्वान्नाव्याप्तिः । ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्र
सिद्धम् गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न । कंबुग्रीवादिमान्नास्तीति प्रतीत्या कंबुग्रीवा
दिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारात् ।
लघुसमनियतगुरुधर्मस्यानवच्छेदकत्वादिति संक्षेपः । यद्वा तत्त्वमित्यत्र पदं किं

तदाह सिषाधयिषया सून्या सिद्धिर्यत्र तिष्ठति स पक्षस्तत्र वर्त्तित्वज्ञानादनुमितिर्भवेत्
सिषाधयिषाविरहविशिष्टायाः सिद्धेरभावः पक्षता न त्वन्यत इत्यर्थः सिषाधयिषा
मात्रं न पक्षता विनापि सिषाधयिषां घनगर्जितेन मेघानुमानात् अत एव साध्यसं
देहोपि न पक्षता विनापि संदेहं तदनुमानात् सिद्धौ सत्यामपि सिषाधयिषासत्वेनु
मितिर्भवत्येव अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणम् तथा च यत्र सिद्धि
र्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता यत्र सिषाधयिषास्ति तत्र सिद्धौ
सत्यामसत्यामपि पक्षता यत्र तु सिद्धिरस्ति सिषाधयिषा च नास्ति तत्र न पक्षता सिषाध
यिषाविरहविशिष्टसिद्धेः सत्वात् ननु यत्र परामर्शानन्तरं सिद्धिः ततः सिषाधयिषा त
त्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः यत्र सिद्धिः परामर्शः सिषाधयिषा
क्रमेणाभवंति तत्र सिषाधयिषाकाले सिद्धेर्नाशात्प्रतिबंधकाभावादेवानुमितिः यत्र सि
षाधयिषासिद्धिपरामर्शास्तत्र परामर्शकाले सिषाधयिषैव नास्ति एवमन्यत्रापि
सिद्धिकाले परामर्शकाले च न सिषाधयिषा योग्यविभुविशेषगुणानां योगपद्यनिषेधात् ४१

एवं तत्त्वव्यापकत्व

तत्कथं सिसाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न यत्र वह्निव्याप्यधूमवान्पर्वतो वह्निमा
निति प्रत्यक्षे समनन्तरं वा ततः सिसाधयिषा तत्र पक्षता संपन्नेयतद्विशेषणस्यावश्यकत्वादिति
यादृश एतद्बोध्यम् यादृशसिसाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्गकानुमितिस्तादृशसिसाधयिषा तादृश
विरहविशिष्टसिद्ध्यभावस्तल्लिङ्गकानुमितौ पक्षता तेन सिद्धिपरामर्शसत्त्वेपि यत्किंचिज्ज्ञानं जाय
धूमवा तामितीच्छायामपि नानुमितिः वह्निव्याप्योयं पर्वतो वह्निमानिति प्रत्यक्षसत्त्वे प्रत्यक्षात्मकं ज्ञानं
जायतामितीच्छायामनुत्पत्त्येव पर्वतो धूमवानिति परामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायाम
पि नानुमितिः सिसाधयिषाविरहकाले यादृशसिद्धिसत्त्वेनानुमितिस्तादृशसिद्धिविशिष्टे
व तल्लिङ्गकानुमितौ प्रतिबन्धकत्वात् तेन पर्वतः तेजस्वी पाषाणमयो वह्निमानिति ज्ञानसत्त्वे
प्यनुमितेर्न विरोधः परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छे
देनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव
प्रतिबन्धिका पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रं विरोधि । इदं तु
बोध्यम् यत्रायं पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरचरणादिमानिति ज्ञानं तत्रा

सत्यामनुमित्सायां पुरुषबलस्य प्रत्यक्षं भवति न तस्यानुमितिः अतोनुमित्साविरहविशिष्टसमान
विषयकप्रत्यक्षसामग्री कामिनीजिज्ञासादिवत्त्वात्तस्यैव प्रतिबंधिका एवं परामर्शानन्तरं
विनापि प्रत्यक्षेच्छां पक्षादिप्रत्यक्षानुपपत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्न
विषयकप्रत्यक्षे प्रतिबंधिका हेतुप्रसंगाद्धेत्वाभासान्विभजते अनैकान्तो विरुद्धश्चाप्य
सिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्च हेत्वाभासास्तु पंचधा आद्यः साधारणस्तु स्या
दसाधारणकोपरः तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् तत्र लक्षणं तु यद्विषयकत्वे
न ज्ञानस्यानुमितिविरोधित्वं तत्त्वम् तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमिति
त्वा विरोधित्वं दोषाः यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं बोध्यम् तेन बाधभ्रमस्यानु
मितिविरोधित्वेपि न क्षतिः तत्र पर्वतो वह्न्यभाववानिति विशिष्टस्याप्रसिद्धत्वान्न हि तद्दोषः न
च यत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूमस्याभासत्वेन स्यात्
तत्र वह्न्यभावव्याप्यवान् ह्रद इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यम् इष्टापत्तेः अन्यथा
बाधस्याप्यनित्यदोषत्वापत्तेः तस्मात्तत्र वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शका ४२

लेवह्निव्याप्यधूमस्यनाभासत्वंच भ्रमादनुमितिप्रतिबंधमात्रं हेतुस्तु नदुष्ट इति इत्यंच सा
ध्याभाववद्वह्निहेत्वादिके दोषः न. एवं चहेतौ येनकेनापि संबंधेनेतितव्याः परेतु यद्विष
यकत्वेनज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वम् सत्प्रतिपक्षे विरोधिव्याप्त्यादि
कमेव। तत्पातः एवं हेतौज्ञानरूपसंबंधेन नचैवंपर्वतोवह्निमान्धूमादित्यादौ पक्षेबाधभ्रमस्य
साध्याभावविषयकत्वेनानुमितिविरोधित्वात् ज्ञानरूपसंबंधेन तद्वत्त्वस्यापिसत्त्वात्तद्धेतौ
रपिबाधितत्वापत्तिरितिवाच्यम् तत्रज्ञानस्यसंबंधत्वाकल्पनात् अत्रसत्प्रतिपक्षित इ
तिव्यवहारेणतत्कल्पनात् तत्रबाधितव्यवहाराभावादित्याहुः अनुमितिविरोधित्वंचानु
मितितत्करणज्ञानान्यतरविरोधित्वम् तेनव्यभिचारिणिनाव्याप्तिः दोषज्ञानंचयद्धे
तुविषयकंतद्धेतुकानुमितौ प्रतिबन्धकम् तेन पक्षहेतौव्यभिचारज्ञानेहेत्वन्तरेणा
नुमित्युत्पत्तेस्तदभावावगाहित्वाद्व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावेपि
नक्षतिः इति संक्षेपः यादृशसाध्यपक्षकहेतौयावन्तोदोषास्तदन्यतमत्वं तद्धेत्वाभासत्वम्
पंचकपदन्तु तत्संभवस्याभिप्रायेण एवं साधारणाद्यन्यतमत्वमनैकान्तिकत्वम्

बाधकालीनेधूमादिसद्धेतौ
ज्ञानस्यसंबंधत्वं
बाधभ्रमकालीनेसद्धेतौ

साध्याभाववत्त्वरूप

प्रतिपक्षशंकालीनेधूमादि
सद्धेतौ

43

साधारणः साध्यवदन्यवृत्तिः तेन च व्याप्तिज्ञानप्रतिबंधः क्रियते असाधारणः साध्यासमा
नाधिकरणो हेतुः तेन साध्यसामानाधिकरण्यग्रहप्रतिबन्धः क्रियते शब्दो नित्यः शब्दत्वा
त्वा दित्यादौ असाधारणः अन्ये तु सपक्षव्यावृत्तिरसाधारणः सपक्षश्च निश्चितसाध्यवान् यथा च
शब्दो नित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदा नासाधारण्यम् तत्र हेतोर्नि
श्चयादित्ति वदन्ति अनुपसंहारी च अत्यन्ताभावाप्रतियोगिसाध्यकादिः अनेन
व्यतिरेक च व्याप्तिज्ञानप्रतिबंधः क्रियते विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी अयं च
साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः सत्प्रतिपक्षस्तु प्रतिहेतुः साध्याभावसाधकः अ
त्र तु हेतुरेक एवेति विशेषः साध्याभावसाधक एव हेतुः साध्यसाधकत्वेनोपन्यस्तः इति
अगृहीताप्रामाण्यकसाध्यव्यापकत्वेनोपस्थितिकालीनागृहीताप्रामाण्यकतदभावव्या
प्यवत्त्वेनोपस्थितिविषयस्स इत्यन्ये अत्र परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमि
तिप्रतिबन्धकं फलम् अत्र केचित् यथा घटाभावव्याप्यवत्ताज्ञानेपि घटचक्षुःसंयोगे
सति घटवत्ताज्ञानं जायते तथा च शंखे सत्यपि पीतत्वाभावव्याप्यशंखत्ववत्ताज्ञाने सति ४३

विरोधिद्वयोपनीतः संशय इति धीरेवं कोटिद्वयव्याप्यदर्शने पि कोटिद्वयव्याप्यप्रमातापसं
शयो भवति तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव यत्रैककोटिव्याप्यदर्शनं
तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः फलबलेन चाधिकबलसमबलभा
वः कल्प्यते इत्याहुस्तन्न तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधा
देरनुदयात् लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबंधकतालाा
घवात् नतूपनीतभानविशेषशाब्दबोधे एव प्रतिबंधकता गौरवात् तथा च प्रतिबं
धकसत्त्वात्कथमनुमितिः नहि लौकिकसन्निकर्षे स्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संश
याकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि विशेषणीयम् यत्र च कोटिद्व
यव्याप्यवत्ताज्ञानं तत्रोभयत्राप्रामाण्यज्ञानात्संशयः नान्यथा अगृहीताप्रामाण्यक
स्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति असिद्धस्तु आश्रयासिद्ध्याद्युन्नतमूलम् आश्रयासि
द्धत्वमाश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः यत्र च काञ्चनमयः पर्वतो वह्निमानिति
साध्यते तत्र पर्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमये पर्वते परामर्शप्रतिबंधः

फलम् स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः अत्र च ह्रदो द्रव्यं धूमवत्त्वादित्या
दौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावज्ञानं जायते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य पराम
र्शस्य प्रतिबन्धः फलम् साध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिमध्ये अन्तर्भूताः साध्ये साध्य
तावच्छेदकाभावः साध्याप्रसिद्धिः एतज्ज्ञाने जाते काञ्चनमयवह्निमानित्यादौ साध्यता
वच्छेदकविशिष्टसाध्यपरामर्शप्रतिबन्धः फलम् एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्र
सिद्धिः यथा काञ्चनमयधूमादित्यादौ अत्र च हेतुतावच्छेदकविशिष्टहेतुज्ञानाभावा
त् तद्धेतुकव्याप्तिज्ञानादेरभावः फलम् एवं वह्निमान्नीलधूमादित्यादौ गुरुतया नी
लधूमत्वस्य हेतुतावच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति बाधस्तु पक्षे साध्याभा
वादिः एतस्य त्वनुमितिः प्रतिबन्धः फलम् तद्धर्मिकतदभावनिश्चयो लौकिकसन्निकर्षा
जन्यदोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति न च संशयसाधारणपक्षे साध्य
संसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमिति य
क्तम् अप्रसिद्धसाध्यकानुमित्यनापत्तेः साध्यसंशयादिकं विनाप्यनुमित्युत्पत्तेश्च ४४

एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकं मानाभावाद्गौरवाच्च अन्यथा स
त्प्रतिपक्षादावपि तदभावव्याप्यज्ञानस्य प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः किं
च भ्रमत्वज्ञानानास्कन्दितबाधबुद्धेः प्रतिबन्धकत्वात् तत्र भ्रमत्वशङ्काविघटनेन प्रा
माण्यज्ञानं क्वचिदुपयुज्यते न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः पक्षे हेत्वभावे स्व
रूपासिद्धिरेव दोष इति वाच्यम् बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात् किंच प
रामर्शानन्तरं बाधबुद्धिस्तत्र व्यभिचारज्ञानादेरकिंचित्करत्वात् बाधस्यानुमि
तिप्रतिबन्धकत्वं वाच्यम् एवं यत्रान्यमितत्वावच्छिन्ने पक्षादौ गन्धव्याप्यपृथि
वीत्वज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम् न च पक्षत्वघटे गन्धसत्त्वात्कथं ब
बाध इति वाच्यम् पक्षतावच्छेदकदेशकालावच्छेदेनानुमितिरनुभवसिद्धा वादि
सा ति सत्प्रतिपक्षव्याप्यभिन्ना ये हेत्वाभासास्तद्व्याप्यान्यपि तन्मध्य एवान्तर्भवति अन्य
थाहेत्वाभासाधिक्यप्रसंगात् बाधव्याप्यः सत्प्रतिपक्षो भिन्न एव स्वतंत्रेच्छेन मुनि
नापृथगुपदेशात् सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति यः सपक्षे विपक्षेव

भवेत्साधारणात्वतः सपक्षविपक्षवृत्तिः साधारण इत्यर्थः सपक्षो निश्चितसा
ध्यवान् विपक्षः साध्यवद्भिन्नः विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम् वस्तुतो विप
क्षवृत्तित्वमेव वाच्यम् विरुद्धस्य साधारणत्वेपि दूषकताबीजस्य भिन्नतया न स्वप
र्यकत्वात् यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः सपक्षविपक्षव्यावृत्त इत्यर्थः
सपक्षः साध्यवत्तया निश्चितः विपक्षः साध्यशून्यतया निश्चितः शब्दोऽनित्यः शब्द
त्वादित्यादौ यदा शब्देऽनित्यत्वसन्देहस्तदा सपक्षत्वं घटादीनामेव तद्व्यावृत्तं च शब्दत्वमि
ति तदानीमसाधारणं यदा तु शब्देऽनित्यत्वनिश्चयस्तदा नासाधारण्यम् इदं तु प्राचा
मतम् नवीनमतं तु पूर्वमुक्तम् तथैवानुपसंहारी केवलान्वयिपक्षकः सर्वमभि
धेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावा
न्नानुमितिः इदन्तु न सम्यक् पक्षैकदेशे सहचारग्रहेपि क्षतेरभावात् अस्तु
वा सहचारग्रहः तावताप्यज्ञानरूपासिद्धिरेव न तु हेत्वाभासत्वं तस्य तथा
पि केवलान्वयिसाध्यकत्वेन ज्ञातमित्युक्तम् यत्साध्यवति नैवास्ति स विरुद्ध उ 45

दाहृतः एवकारेण साध्यवत्त्वावच्छेदेन हेत्वभावो बोधितः नञा च साध्यव्यापकीभूता
भावप्रतियोगित्वं तदर्थः असिद्धिं विभजते आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धि
रप्यथ व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा पक्षासिद्धिर्यत्र पक्षो भवे
त्काञ्चनमयो गिरिः ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा व्याप्यत्वासिद्धिरपरा
नीलधूमादिके भवेत् पक्षासिद्धिरिति आश्रयासिद्धिरित्यर्थः अपरेति स्वरूपा
सिद्धिरित्यर्थः नीलधूमादिकमिति नीलधूमत्वे गुरुतया न हेतुतावच्छेदकम् स्व
समानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् धूम
प्रागभावत्वे संग्रहाय स्वसमानाधिकरणेति विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्ष
तेति कपिसंयोगतदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षितत्वमत उक्तं
विरुद्धयोरिति तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीनो
साध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः साध्यशून्य इति साध्यशून्यो यत्र पक्ष
स्त्वसौ बाध उदाहृतः उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते पक्षः पक्षता

वङ्केदकविशिष्टइत्यर्थः तेनघटेगंधवत्त्वेपिनक्षतिः एवंमूलावच्छिन्नोवृक्षः क
पियोगीत्यत्रबोध्यमित्यर्थः इत्यनुमानंसमाप्तम् ॥ उपमितिंलक्षयति ग्रामीण
स्यप्रथमतः पश्यतोगवयादिकम् सादृश्यधीर्गवादीनां यास्यात्साकरणंमतम् वा
क्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते गवयादिपदानांतु शक्तिधीरुपमाफलम्
यत्रारण्यकेन केनचिद्ग्रामीणायोक्तं गोसदृशोगवयपदवाच्य इति पश्चाद्ग्रामीणेन
क्वचिदारण्यादौ गवयोदृष्टः तत्रगोसादृश्यदर्शनंयज्जातं तदुपमितिकरणम् तदनन्तरं
गोसदृशोगवयपदवाच्यइति अतिदेशवाक्यस्मरणंयज्जायते तदुपमितिः नत्वयंगवय
पदवाच्यइत्युपमितिः गवयान्तरेशक्तिग्रहाभावप्रसंगात् इत्युपमानम् शाब्दबोधप्र
करणंदर्शयति पदज्ञानन्तुकरणं द्वारंतत्रपदार्थधीः शाब्दबोधःफलंतत्र शक्तिधी
सहकारिणी नतुज्ञायमानंपदंकरणं पदाभावेपिमौनिश्लोकादौशाब्दबोधात् पदा
र्थधीरिति पदजन्यपदार्थस्मरणंव्यापारः अन्यथा पदज्ञानवतःप्रत्यक्षादिनापदा ४६
र्थोपस्थितावपि शाब्दबोधापत्तेः तत्रापिवृत्त्यापदजन्यत्वंबोध्यम् अन्यथा घटा

दिपदार्थसमवायसम्बन्धेनाकाशस्मरणो जाते आकाशस्यापि शाब्दबोधापत्तेः
वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः अत्रैव शक्तिज्ञानस्योपयोगः एवं शक्तिग्रहाभा
वे पदज्ञानेपि तत्सम्बन्धेन स्मरणानुपपत्तेः पदज्ञानस्य हि एकसम्बन्धिज्ञानविधया
ऽपरसम्बन्धिस्मारकत्वम् शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः सा चास्माच्छब्दादयमर्थो बोद्धव्य
इतीश्वरेच्छारूपा आधुनिके नास्ति शक्तिरस्त्येव एकादशेऽहनि पिता नाम कुर्या
दितीश्वरेच्छायाः सत्वात् आधुनिकसंकेतिते तु न शक्तिरिति सम्प्रदायः नव्यास्तु ई
श्वरेच्छा न शक्तिः किन्तु इच्छैव तेनाधुनिकसंकेतितेपि शक्तिरस्तीत्याहुः शक्तिग्रह
स्तु व्याकरणादितः तथाहि शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च
वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः धातुप्रकृतिप्रत्यया
दीनां शक्तिग्रहो व्याकरणाद्भवति क्वचित्तु सति बाधके त्यज्यतेपि यथा वैयाकर
णैराख्यातस्य कर्त्तरि शक्तिरुच्यते चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याभेदान्व
यः स तु गौरवात्त्यज्यते किन्तु कृतौ शक्तिर्लाघवात् कृतिश्चैत्रादौ प्रका

42

रीभूय भासते न च कर्त्रैकत्वाभिधानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्
कर्त्रैकसंख्यानभिधानस्य तत्र तंत्रत्वात् संख्याभिधानयोग्यस्य कर्मत्वाद्यनवरु
द्धः प्रथमान्तपदोपस्थाप्यः कर्मत्वादीतरविशेषणत्वतात्पर्यविषय
यत्वमर्थः तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रसंख्यान्वयः यत्र कर्मादौ न विशे
षणत्वतात्पर्यं तद्वारणाय प्रथमान्तेति यद्वा धात्वर्थातिरिक्ताविशेषणत्वे
प्रथमदलार्थः तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणम् स्तोकं पचती
त्यादौ स्तोकादेर्वारणाय द्वितीयदलम् तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणा
मिति एवं व्यापारेऽपि न शक्तिः गौरवात् रथो गच्छतीत्यादौ तु व्यापारे आश्रयत्वे वा
लक्षणा जानातीत्यादौ त्वाश्रयत्वे नश्यतीत्यादौ तु प्रतियोगित्वे निरूढलक्षणा
उपमानाद्यथा शक्तिग्रहस्तथोक्तम् . एवं कोशादपि शक्तिग्रहः सति बाधके
क्वचित्त्यज्यतेऽपि यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः
कोशेन व्युत्पादिता तथापि लाघवान्नीलादावेव शक्तिर्नीलरूपविशिष्टे तु लक्षणेति ४७
दि

एवमाप्तवाक्यादपि यथा कोकिलः पिकपदवाच्य इत्यादिशव्दात्पिकादिशव्दानां शक्तिग्रहः एवम्
व्यवहारादपि यथा प्रयोजकवृद्धेन घटमानयेत्युक्तम् तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः
तदवधार्य पार्श्वस्थो वालो घटानयनरूपकार्यं घटमानयेति शव्दप्रयोज्यमित्यवधार
यति ततश्च घटं नय गामानयेत्यादिवाक्यादौ आवापोद्वापाभ्यां घटादिपदानां कार्यान्विते
घटादौ शक्तिं गृह्णाति इत्थं च भूतले नीलो घट इत्यादिशव्दान्न शाव्दवोधः घटादिपदानां का
र्यान्वितघटादिशाव्दवोधे सामर्थ्यावधारणात् कार्यतावोधं प्रति च लिङादीनां सामर्थ्यात्तद
भावान्न शाव्दवोध इति केचित् तन्न प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवे
न पश्चात्तस्य परित्यागौचित्यात् अत एव चैत्रपुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ मुखप्रसाद
मुखमालिन्याभ्यां सुखदुःखे अनुमीय तत्कारणत्वेन परिशेषाच्छाव्दवोधं निर्णीय तद्धेतुता
यां तं शव्दमवधारयति न चात्र व्यभिचारात्कार्यान्विते न शक्तिः न च तत्र तं पश्येत्यादिशव्दा
न्तरमध्याहार्यं मानाभावात् चैत्रपुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च इत्थं च लाघवाद
न्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति एवं च वाक्यशेषादपि शक्ति
ग्रहः यथा यवमयश्चरुर्भवति इत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः

कं गोतु म्लेच्छानां तत्र अन्यथा ओषधयो म्लायन्ते अथैते मोदमानास्तिष्ठन्ति इति वाक्यशेषा
द्दीर्घशूके शक्तिर्निर्णीयते कंगोतु शक्तिभ्रमात्प्रयोगः नानाशक्तिकल्पने गौरवात् ह
रिपदादौ तु विनिगमकाभावात् नानाशक्तिकल्पनम् एवं विवरणादपि शक्तिग्रहः विवर
णन्तु तत्समानार्थकपदान्तरेण तदर्थकथनम् यथा घटोऽस्तीत्यत्र कलशोऽस्तीत्यनेन वि
वरणात् घटपदस्य कलशे शक्तिग्रहः एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणादा°
ख्यातस्य यत्नार्थकत्वं कल्प्यते एवं प्रसिद्धपदसान्निध्यादपि शक्तिग्रहः यथा इह
सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य कोकिले शक्तिग्रहः इति तत्र जातावेव
शक्तिग्रहः ननु व्यक्तौ व्यभिचारात् आनन्त्याच्च व्यक्तिं विना जातिभानस्यासम्भवाद्व्यक्ते
रपि भानमिति केचित् तन्न शक्तिं विना व्यक्तिभानानुपपत्तेः न च व्यक्तौ लक्षणानुपपत्ति
प्रतिसन्धानं विनापि व्यक्तिबोधात् न च व्यक्तिशक्तावानन्त्यं सकलव्यक्तावेकस्या एव शक्तेः
स्वीकारात् न चाननुगमः गोत्वादेवावगमकत्वात् किञ्च गौः शक्येति शक्तिग्रहे यदि त
दा व्यक्तौ शक्तिः यदि तु गोत्वं शक्यमिति शक्तिग्रहः तदा गोत्वप्रकारकपदार्थस्मरणं शा ४८
ब्दबोधश्च न स्यात् समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हे

त्वात् किंच गोत्वे यदि शक्तिः तदा गोत्वं शक्यतावच्छेदकं वाच्यम् गोत्वत्वन्तु सकलगवितरा
समवेतत्वे सति सकलगोसमवेतत्वम् तथा च गोव्यक्तीनां शक्यतावच्छेदकेनुप्रवेशात्तत्रैव गौर
वम् तस्मात्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृति
विशिष्टव्यक्तावेव विश्राम्यतीति शक्तंपदं चतुर्विधम् क्वचिद्यौगिकं क्वचिद्रूढं क्वचि
द्योगरूढम् क्वचिद्यौगिकरूढम् तथाहि यत्रावयवार्थ एव बुध्यते तत्र यौगिकम् य
था पाचकादिपदम् यत्रावयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुध्यते तद्रूढम्
यथा गोपदम् मण्डलादिपदम् यत्र त्ववयवशक्तिविषये समुदायशक्तिरप्यस्ति
तद्योगरूढम् यथा पंकजादिपदम् तथाहि पंकजपदमवयवशक्त्या पंकजनिकर्तृरू
पमर्थं बोधयति समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति न च केवलावय
वशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम् रूढिज्ञानस्य केवलयौगिकार्थबोधे प्रतिबन्धकत्वा
दिति प्राञ्चः वस्तुतस्तु समुदायशक्त्युपस्थिते पद्मेऽवयवार्थपंकजनिकर्तुरन्वयो भ
वति सान्निध्यात् यत्र तु रूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र लक्षणया कुमुदादेर्बोधः
यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं पद्मत्वस्य च बाधः तत्रावयवशक्तिमात्रेण निर्वाह

49

इत्याहुः। यत्र तु स्थलपद्मादाववयवार्थबाधस्तत्र समुदायशक्त्युपस्थितेन रूपेणावबोधः
यदि तु स्थलपंकजविजातीयमेव तदा लक्षणैव यत्र तु रूढ्यर्थयौगिकार्थयोः स्वातन्त्र्येण
बोधः तद्यौगिकरूढम् यथोद्भिदादिपदम् तत्र हि ऊर्ध्वभेदनकर्तृतरुगुल्मादि
रपि बुध्यते यागविशेषोपि लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः गंगा
यां घोष इत्यादौ गंगापदस्य शक्यार्थप्रवाहरूपे घोषस्यान्वयानुपपत्तिः तात्पर्यानुप
पत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः सा च शक्यसम्बन्धः तथा हि
प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणम् ततः शाब्दबोधः यत्र तु
यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात् तदा यष्टीः प्रवेशयेत्यादौ लक्षणा न स्यात् यष्टि
षु प्रवेशस्यान्वयानुपपत्तेरभावात् तेन प्रवेशे भोजन तात्पर्यानुपपत्त्या यष्टिधरे
लक्षणा एवं काकेभ्यो दधि रक्ष्यतामित्यादौ दध्युपघातके लक्षणा सर्वतो दधिरक्ष
णस्य तात्पर्यविषयत्वात् एवं छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वेन लक्षणा
इयमेवाजहत्स्वार्थलक्षणेत्युच्यते एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात् यदि
चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा क्वचिद्गंगापदस्य तीरे क्वचिद्घोषपदस्य मत्स्या ४९

दौ लक्षणेति चिन्त्यमोनस्यात् इदं तु बोध्यं शक्यार्थसंबंधो यदि तीरत्वेन रूपेण गृहीतस्तदा
तीरत्वेन रूपेण तीरशाब्दबोधः यदि तु गंगातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मर
णं अत एव लक्ष्यतावच्छेदके न लक्षणा तत्प्रकारकबोधस्य तत्र लक्षणां विनाप्युपपत्तेः प
रत्वेवं क्रमेण शक्यार्थस्य परंपरासंबंधावच्छेदकेपि प्रसक्तिर्न स्यात् तत्प्रकारकपदार्थस्मरणं
प्रति तत्तत्पदस्य सामर्थ्याभिव्यक्तस्य सत्त्वादिति विभावनीयं यत्र तु शक्यार्थस्य परंपरासंब
न्धरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते यथा द्विरेफादिपदे रेफद्वयसंबंधो भ्रमरपदे ज्ञायते
भ्रमरपदस्य च संबंधो भ्रमरे ज्ञायते तत्र लक्षितलक्षणा किंतु लाक्षणिकं पदं नानुभावकं ला
क्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणं प्रागुक्तलक्षणान्यतरसंबंधेन तत्तत्पदार्थान्वित-
स्वशक्यार्थशाब्दबोधप्रतिपदानां सामर्थ्यावधारणात् वाक्ये तु शक्तेरभावात् शक्य
संबंधरूपा लक्षणापि नास्ति यत्र गंभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य नदीतीरे
लक्षणा गंभीरपदार्थस्य नद्या सहाभेदान्वयः क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात्
पदार्थैः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति नियमेन यदि त्वेकदेशान्वयो न स्वीक्रि

न्या॰ मु॰
टी॰ ५॰
50

यतेन तदा नदीशब्दस्य गम्भीरनदीतीरे लक्षणा गम्भीरपदं तात्पर्यग्राहकं कुञ्जीरावयेवं तत्र हि
चित्रगुपदार्थैकदेशान्वयः स्वीक्रियते तदा गोपदस्य गोमतिलक्षणया विचित्राभेदा
न्वयः यदि त्वेकदेशान्वयो न स्वीक्रियते तदा गोपदस्यापि चित्रगोमति लक्षणा चित्रपदं तात्प
र्यग्राहकं एवमारूढवानरो वृक्ष इत्यत्रापि वानरपदं वानरारोहकर्मणि लक्षणा आ
रूढपदं तात्पर्यग्राहकं एवमन्यत्रापि बोध्यं ननु रुषेतु सर्वपदे लक्षणा तथाहि राज
पुरुष इत्यादौ राजादिपदार्थेन पुरुषादिपदार्थस्य साक्षान्नान्वयः निपातातिरिक्तना
मार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् अन्यथा राजा पुरुष इत्यादावपि तथान्वय
बोधः स्यात् घटो न पट इत्यादौ घटपटाभ्यां नञः साक्षादेवान्वयात् निपातातिरिक्तेति
नीलो घट इत्यादौ नामार्थयोरभेदसंबन्धेनान्वयात् भेदेनेति न च राजपुरुष इत्यादौ
लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यं अस्मृतविभक्तेरपि ततो बोधोदयात् तस्मात् ५०
राजपदादौ राजसंबन्धिनि लक्षणा तस्य पुरुषेण सहाभेदान्वयः एवं तु धवखदिरौ छिं
धीत्यादौ धवः खदिरश्च विभक्त्यर्थे द्वित्वप्रकारेण बुध्येते तेन न तत्र लक्षणा न च समहि

येलक्षणोतिवाच्यं साहित्यस्यत्वयोरपि द्वंद्वदर्शनात् नचैकक्रियान्वयित्वरूपंसाहित्यमस्
तीति वाच्यंक्रियाभेदेपिधवखदिरौवृश्चछिंधीत्यादौतयादर्शनात्साहित्यस्याप्यननुभवाच्च।
अतएवराजपुरोहितौसायुज्यकामौयजेयातामित्यत्रयलक्षणाभावात् द्वंद्वस्याश्रीयतेतस्मा।
त्साहित्याद्विकंतार्थः किंतुवास्तवोभेदोयत्रतत्रद्वंद्वः नचनीलघटयोरभेदस्यत्वेकथमि
तिवाच्यं तत्रनीलपदस्यनीलत्वेघटपदस्यघटत्वेलक्षणाः भेदरूपत्वस्यचाश्रयाभेदरूपत्व
र्थात् समाहारद्वंद्वेतुयदिसमाहारोप्यनुभूयतेतदुच्यतेतदाऽहिनकुलमित्यादौपरपदे
हिनकुलसमाहारेलक्षणापूर्वपदंतुतात्पर्यग्राहकं नचभेरीमृदंगंवादयेत्यत्रकथंसमाहार
स्यापितत्वबुद्धिविशेषरूपस्यवादनासंभवादितिवाच्यं परंपरासंबंधेनतदन्वयात् एवंपच
मलोत्पादावपि परंतुहिनकुलमित्यादिरहिर्नकुलस्यबुध्यतेप्रत्येकमेकत्वात्तान्वयः।
समाहारसंज्ञाचयत्वैकत्वनपुंसकत्वेचप्राणित्र्यैदित्यद्वंद्वेणानुक्रम तत्रैवान्यत्रनैकवचनमा
साधितत्वात्ः पितरौमातरावित्यादावपित्पदेजनकदंपत्योः मातृपदेस्त्रीजनकेदंपत्यो।

लक्षणा एवमन्यत्रापि यदा तत्र तु लक्षणा घटत्वेन रूपेण नानाघटोपस्थितिसंभवात् कर्मधार
यस्थले तु नीलोत्पलमित्यादावभेदेन संबंधेन नीलार्थप्रकारकत्वेन लक्षणा अत एवानिषा
दस्थपतिं याजयेदित्यत्र न तत्पुरुषो लक्षणापत्तेः किन्तु कर्मधारयो लक्षणाभावात् न च नि
षादस्य संकरजातीयस्य वेदानधिकारात् याजनासंभव इति वाच्यम् निषादस्य विद्याप्र
युक्तत्वेन कल्पनीयत्वात् लाघवेन स्वत्वार्थान्वये तदनुपपत्त्या कल्पनयाः फलस्वत्व
गौरवत्वेन दोषत्वादिति उपकुंभमर्द्धपिप्पलीत्यादौ परपदे तत्संबंधिनि लक्षणा पूर्वपदार्थ
प्रधानत्वान्वयबोधादिति इत्थं च समासे न क्वापि शक्तिः पदशक्त्यैव निर्वाहात् इति
आसत्तिर्योग्यताकांक्षा तात्पर्यज्ञानमिष्यते कारणमासत्तिज्ञानं योग्यताज्ञानमाकांक्षा
ज्ञानं तात्पर्यज्ञानं च शाब्दबोधकारणं तत्रासत्तिपदार्थमाह सन्निधानं तु पदस्यासत्तिरु ५१
च्यते अन्वयिप्रतियोगिपदयोरव्यवधानमासत्तिः तज्ज्ञानं शाब्दबोधे कारणं क्वचिद्व
वहितेऽप्यव्यवधानभ्रमात् शाब्दबोधः वस्तुतस्तु अव्यवधानज्ञानस्यानपेक्षितत्वात् ॥

यत्पदार्थस्य यत्पदार्थेन सहान्वयोपेक्षितः तयोः पदयोरव्यवधानेनोपस्थितिः शाब्दबो
धे कारणं तेन गिरिर्भुक्तं वह्निमान्देवदत्तेनेत्यादौ न शाब्दबोधः नीलो घटो द्रव्यं पटइ
त्यत्र यदा नीलपदयोरन्वयो विवक्षितस्तत्र तदा नीलघटयोर्नासन्नः भ्रमाच्छा
ब्दबोधमात्रं आसत्तिभ्रमेण शाब्दभ्रमाभावेऽपि न क्षतिः यत्र तु श्रोत्राकाशादौ व्यवहि
तानां अव्यवधानेनोपस्थितिः तत्रासत्तिसत्वादेवान्वयबोधः इयं चासत्तेरुप
स्थितिरूपत्वात् तज्ज्ञानस्याहेतुत्वात् आसत्तिभ्रमाच्छाब्दबोधभ्रमाभावेऽपि न क्षतिः
ननु पचत्युदीचीकुंडली वासमीदेवदत्त इत्यादौ पूर्वोक्तं उत्तरपदस्मरणेन पूर्वपदस्य
स्मरणस्य नाशात् अव्यवधानेनोत्तरपदस्मरणासंभव इति चेन्न प्रत्येकपदानुभव
जन्यसंस्कारैः स्मरणस्य तावत्पदविषयकस्मरणस्याव्यवधानेनोत्पत्तेः नानासन्नि
कर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणस्य ज्ञानैरपि संभवात् तावत्पदसंस्का
रसहितचरमपदज्ञानस्योद्बोधकत्वात् कथमन्यथा नानावर्णैर्नानावर्णा[illegible]कपदेव
स्मरणं परे तु तावत्पदार्थानां स्मरणादेकदैव खलेकपोतन्यायात्तावत्पदार्थानां क्रिया

न्या॰ मु॰
टी॰ ५२

52

कर्मभावेनान्वयरूपः शाब्दबोधो भवतीति वाच्यं तदाहुः हृद्यापुवानः शिशपः कपि
ताः खलेयथामीयुगपत्पतंतीति तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवंति
परं तु यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते तेन तेनान्वितः स्वार्थः पदैरेवावगम्य
ते तथा च खंडवाक्यार्थबोधानंतरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्याहुः।
एतेन तावद्वर्णाभिव्यंग्यः पदार्थः स्फोटोपि निरस्तः तत्तद्वर्णसंस्कारसहितचरमव
र्णोपलंभेन तत्तद्योग्यजवे नैवोपपन्नेरिति इदं तु बोध्यं यत्तु द्वारमित्युक्ते तत्र पिधेही
त्यादिपदस्यज्ञानादेव बोधः न तु पिधानादिरूपार्थज्ञानात् पदजन्यतत्तत्पदा
र्थोपस्थितेस्तत्र शाब्दबोधहेतुत्वात् किंच क्रियाकर्मपदानां तेनैव सह साकां
क्षितत्वात्तेन क्रियापदं विना कथं बोधः स्यात् तथाच पुष्पेभ्य इत्यादौ स्पृहयतीति प
दाध्याहारं विना चतुर्थ्यनुपपत्तेः तदास्याध्याहारस्यावश्यकः योगिनां निर्वि॰१
पदार्थे तत्र तत्तद्योग्यतापरिकीर्तनेति एकपदार्थेऽपरपदार्थसंबंधो योग्यता तेन यद्ध्यः १
तज्ज्ञानाभावाच्च वह्निना सिंचतीत्यादौ न शाब्दबोधः न चैतस्यायोग्यतायाज्ञाने शा ५२

ब्दबोधात् प्रामाण्यं न संभवति वाक्यार्थस्यापूर्वत्वादिति चेन्न तत्तत्पदार्थस्मरणे
सति क्वचित्संशयरूपस्य क्वचिच्च निश्चयरूपस्यापि योग्यताज्ञानस्य संभवात् तथा
त्वयोग्यताज्ञानं न शाब्दबोधे कारणं वह्निना सिंचतीत्यादौ सेके वह्निकरणत्वाभाव
रूपायोग्यतानिश्चये न प्रतिबंधान्न शाब्दबोधः तदभावनिश्चयस्य लौकिकसन्नि
कर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रप्रतिबंधकत्वाच्छाब्दबोधं प्रत्यपि प्रतिबंधक
त्वसिद्धेः योग्यताज्ञानविलंबाच्च शाब्दबोधविलंबो सिद्ध इत्यस्माकं आकांक्षेति वेति
यत्पदेन विनान्यस्याननुभावकता भवेत् आकांक्षेति येन पदेन विना यत्पदस्या
न्वयाननुभावकत्वं तेन सह तस्याकांक्षेत्यर्थः क्रियापदं विना कारकपदं नान्वयबोधं
जनयतीति तेन तस्याकांक्षा वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या च
रितार्थपदं तु घटकर्मकताबोधं प्रति घटपदोत्तरं द्वितीयारूपाकांक्षाज्ञानं कारणम्
तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः अयमेति पुत्रो राज्ञः पुरुषो
ऽपसार्यतामित्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात्तेनैवान्वयबोधः

न्या॰ मु॰
टी॰ ५३
53

पुरुषेणासहतात्पर्यग्रहेतुत्वेनसहान्वयबोधः स्यादेव तात्पर्यंनिर्वक्ति वक्तुरिच्छातुता
त्पर्यंपरिकीर्तितं यदितात्पर्यज्ञानंकारणंनस्यात्तदासैंधवमानयेत्यादौ क्वचिदश्वस्य
क्वचिल्लवणस्यबोधइतिनियमोनस्यात् नचतात्पर्यग्राहकानांप्रकरणादीनांशा
ब्दबोधेकारणत्वमस्त्वितिवाच्यम् तेषामननुगमात् तात्पर्यज्ञानजनकत्वेनते
षामनुगमेतुतात्पर्यज्ञानमेवलाघवात्कारणमस्तु इत्थंचवेदस्थलेतात्पर्यज्ञाना
र्थमीश्वरःकल्प्यते नचतत्राध्यापकस्यतात्पर्यज्ञानंकारणमितिवाच्यम् सर्गा
दावध्यापकाभावात् नचप्रलयएवनास्तिकुतःसर्गादिरितिवाच्यम् प्रलयस्यागम
प्रतिपाद्यत्वात् इत्थंचशुकवाक्येपिईश्वरीयतात्पर्यज्ञानंकारणम् विसंवादिशु
कवाक्येतु शिक्षयितुरेवतात्पर्यज्ञानंकारणं अन्येतुनानार्थादौक्वचिदेवतात्
पर्यज्ञानंकारणम् तथाचशुकवाक्येविनैवतात्पर्यज्ञानंशाब्दबोधः वेदेतुना ५३
दिमीमांसापरिशोधितर्कैरर्थावधारणमित्याहुः ॥ इतिशाब्दबोधः ॥ एवमनु
भवस्मरणभेदाद्बुद्धेर्द्वैविध्यमुक्त्वातत्रानुभवप्रकारादर्शिताः सुगमतयास्मरण

नदर्शितं तत्र हि पूर्वानुभवः कारणं अथ केचित् अनुभवत्वेन न कारणत्वं किंतु ज्ञानत्वेन ।
अन्यथा स्मरणान्तरे स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात् स ।
न्मतेनैतेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः तत्र पक्षे समूहालंबनो
त्तरं घटपटादीनां क्रमेण ज्ञानं भजति सकलविषयकस्मरणं च नाभूत् तत्र फलस्य संस्कार
नाशकत्वाभावात् कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यं तथा च न क्रमिक ।
स्मरणापत्तिः न च पुनः पुनः स्मरणात् दृढतरसंस्कारानुपपत्तिः उद्बोधकसमवधा-
नस्य दार्ढ्यपदार्थत्वात् न च विनिगमनाविरहो देवज्ञानत्वेनापि जनकता स्यादिति वाच्यं
विशेषधर्मेणाव्यभिचारज्ञाने सामान्यधर्मेणान्यथासिद्धत्वात् कथमन्यथा दंडस्य भ्र
मिद्वारा द्रव्यत्वेन रूपेण न कारणत्वं न चान्तरालिकस्मरणानां संस्कारनाशकत्वसंशयाद्व्य
भिचारसंशय इति वाच्यं अनंतसंस्कारतन्नाशकल्पनापत्त्या चरमस्मरणस्यैव संस्कारना
शकत्वकल्पनेन व्यभिचारसंशयाभावात् इदानीं क्रमप्राप्तं मनो निरूपयितुमाह साक्षा ।
त्कारे सुखादीनां करणं मन उच्यते एतेन मनसि प्रमाणं दर्शितं तथाहि सुखसाक्षा

न्या॰ मु॰
टी॰ ५४
54

न्कारः सकरणकः जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवत् इत्यनुमानेन करणस्य मनसः
सिद्धेः नचैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यम् लाघवादेकस्यैव स
कलसाक्षात्कारकरणतया सिद्धेः एवं सुखादीनामसमवायिकारणसंयोगाश्रयतया मनः
सिद्धिर्भवेदथ मनसोऽणुत्वे प्रमाणमाह अयौगपद्यात् ज्ञानानां तस्याणुत्वमपीष्यते ज्ञा
नानां चाक्षुषरासनादीनामयौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम् तत्र ना
मेन्द्रियाणां सत्यपि विषयसन्निधाने यत्संबंधादेकेन्द्रियेण ज्ञानमुत्पद्यते यदसंबंधाच्च
त्वगादिभिः परैर्ज्ञानं नोत्पद्यते तन्मनः विभुत्वे चासंनिधानेन संभवतीति न विभु मनः
नच तदानीमदृष्टविशेषाद्बोधविलंबादेव तत्तज्ज्ञानविलंब इति वाच्यम् तथासति चक्षु
रादीनामपि कल्पनानापत्तेः नच दीर्घशष्कुलीभक्षणादौ नानावधानभाजां च कथमे
ककाले नानेन्द्रियजं ज्ञानमिति वाच्यम् मनसोऽतिलाघवात् झटिति नानेन्द्रियसंबंधा ५४
त्नानाज्ञानोत्पत्तेः उत्पलशतपत्रभेदादाविव यौगपद्यप्रत्ययस्य भ्रान्तत्वात् नच मन
सः संकोचविकाशशालित्वात् उभयोरप्युपपत्तिरस्त्विति वाच्यम् नानावयवतन्नाशादिक

त्वेनगौरवात् लाघवात्तिरवयवस्याप्युरूपस्यैव मनसः कल्पनादिति संक्षेपः द्रव्यं
निरूप्य गुणान्निरूपयति अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः अथ गुण
त्वजातौ किं मानमिति चेदिदं द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचिद्
धर्मावच्छिन्ना निरवच्छिन्नकारणताया असंभवात् न हि रूपत्वादिकं सत्तावान्तरजा
वच्छेदिकान्यूनानतिरिक्तदेशवृत्तिकत्वात् अतश्चतुर्विंशत्यनुगतवाच्यं तदेव
गुणत्वमिति यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेः तथापि द्रव्यत्व
व्यापकतावच्छेदकसत्ताभिन्नजातिमत्त्वं तदर्थः भवति हि गुणत्वं द्रव्यत्वव्यापक
तावच्छेदकं तद्वत्ता गुणानामिति कर्मत्वं द्रव्यत्वे वा न द्रव्यत्वव्यापकतावच्छेदकं ग
गनादौ द्रव्यकर्मणोरभावात् द्रव्यत्वं सामान्यत्वादिकं वा न जातिरिति तद्व्युदा
सः निर्गुणा इति यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे सति निर्गु
णत्वं बोध्यम् आत्मादीनां न सामान्यवत्त्वे कर्मणो न कर्मान्यत्वं द्रव्यस्य निर्गुणत्वा
मिति न तत्रातिव्याप्तिः निष्क्रिया इति स्वरूपकथनं न तु लक्षणं गगनादावतिव्याप्तेः

व्या॰ मु॰
टी॰ ५५
55

रूपंरसः स्पर्शगंधौपरत्वमपरत्वकं द्रवोगुरुत्वंस्नेहश्चवेगोमूर्तगुणाअमी वेगेनास्थिति
स्थापकोप्युपलक्षणीयः अमूर्तेष्ववर्ततेइत्यर्थः लक्षणंतुमूर्तावृत्तिजात्यावत्त्वं एवमग्रे
पि धर्माधर्मौभावनाचशब्दोबुद्ध्यादयोपिच एतेमूर्तगुणाः सर्वेविद्वद्भिः परिकीर्तिताः
संख्यादिर्विभागांतोउभयेषांगुणामताः मूर्तामूर्तगुणाइत्यर्थः लक्षणंतुमूर्तवृ।
त्तिवृत्त्यमूर्तवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं संख्यात्वादिकमादायलक्षणसमन्व
यः संयोगश्चविभागश्चसंख्याद्वित्वादिकास्तथा द्विपृथक्त्वादयस्तद्वदेतेनेकाश्रि
तागुणाः अनेकाश्रिताइति संयोगविभागद्वित्वादीनांद्विवृत्तीनांत्रिचतुष्ट्वादिकंत्रि
चतुरादिवृत्तीतिबोध्यं अतःशेषगुणाः सर्वेमताएकैकवृत्तयः रूपरसगंधस्पर्शैकत्वपरि
माणैकपृथक्त्वपरापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टश
ब्दाइत्यर्थः बुद्ध्यादिषट्कंस्पर्शांताः स्नेहः सांसिद्धिकोद्रवः बुद्ध्यादीति बुद्धिसुखदुःखे १४
च्छाद्वेषप्रयत्नाइत्यर्थः स्पर्शांताइति रूपरसगंधस्पर्शाइत्यर्थः द्रवइतिद्रवत्वं अदृ
ष्टभावनाशब्दाअमीवैशेषिकागुणाः विशेषाएववैशेषिकाः स्वार्थेठक् विशेषगुणा

इत्यर्थः संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एवच संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा
नीत्यर्थः एते तु द्वीन्द्रियग्राह्याः चक्षुषा त्वचापि ग्रहणयोग्यत्वात् अथ स्पर्शान्तशब्दकाः
बाह्यैकैकेन्द्रियग्राह्याः रूपादीनां चक्षुरादिग्राह्यत्वात् गुरुत्वादृष्टभावनाः अतीन्द्रिया
विभूनां तु ये स्युर्वैशेषिका गुणाः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्य
र्थः अकारणगुणोत्पन्ना एते तु परिकीर्तिताः कारणगुणेन कार्यगुणा उत्पाद्यन्ते ते का
रणगुणपूर्वा रूपादयो ये वदन्त्येते बुद्ध्यादयस्तु न तादृशा आत्मादेः कारणाभावात् अपाक
जास्तु स्पर्शान्ता द्रवत्वं च तथाविधं पाकजरूपादीनां कारणगुणपूर्वकत्वाभावादपा
कजद्रव्यं च तथाविधमपाकजं स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकं ५५ स्थितिस्था
पक इत्येते स्युः कारणगुणोद्भवाः नवैकत्वमपि बोध्यं संयोगश्च विभागश्च वेगश्चैते तु
कर्मजाः कर्मजत्वं च यद्यपि न साधर्म्यं घटादावतिव्याप्तेः संयोगजसंयोगे व्याप्तेश्च तथा
पि कर्मनव्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यं एवमन्यत्रापि क्वचिदूह्यं स्पर्शान्तपरि
माणैकपृथक्त्वस्नेहशब्दके भवेदसमवायित्वं घटादिरूपरसगन्धस्पर्शाः कपालादिरूप

न्या॰ मु॰
टी ५६
56

रसप्रथमस्पर्शेभ्यो भवंति एवं कपालादिपरिमाणादीनां घटादिपरिमाणासमवायिकार
णत्वं एवं शब्दस्यापि द्वितीयशब्दं प्रति एवं स्थितिस्थापकेऽनयोरपि विज्ञेयं अथ
वैशेषिके गुणे आत्मनः स्यान्निमित्तत्वं बुद्ध्यादीनामिच्छादिनिमित्तत्वादिभावः उष्ण
स्पर्शगुरुत्वयोः वेगोपि च द्रवत्वं च संयोगादिद्वये तथा द्विधैव कारणत्वं स्यात् अस
मवायिकारणत्वं निमित्तकारणं च तथाहि उष्णस्पर्शस्यासमवायी पाकजे निमित्तं गु
रुत्वं तु पतनयोरसमवाय्यभिघाते निमित्तं वेगो वेगस्पंदनयोरसमवायी अभि
घाते निमित्तं द्रवत्वं द्रवत्वस्पंदनयोरसमवायि संग्रहे निमित्तं भेरीदण्डसंयोगः श
ब्दे निमित्तं भेर्याकाशसंयोगोऽसमवायी वंशदलद्वयविभागः शब्दे निमित्तं वंशदला
काशविभागोऽसमवायी अथ प्रादेशिको भवेत् प्रादेशिकेऽव्याप्यवृत्तिः वैशेषिको विभु
गुणः संयोगादिद्वयं तथा चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलंभकं रूपत्वजातिमत्त्वं
त्वसिद्धा रूपशब्दो हि लोहितनीलेति नीलनीलितिचेन्मास्तु रूपशब्दप्रयोगः तथापि नीलपी
तादिष्वनुगतजातिविशेषानुभवसिद्ध एव रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्णः ५६

इति वर्णशब्दो लोहितनीलप्रतीतिरस्त्येव एवं नीलत्वादिकमपि प्रत्यक्षसिद्धं नैवैकैका एव
नीलादिव्यक्तय इति एकव्यक्तिकत्वान्नीलत्वादिकं न जातिरिति वाच्यम् नीलो नष्टो रक्त उ
त्पन्न इत्यादिप्रतीतेर्नीलादेरुत्पादविनाशशालितया नानात्वात् अन्यथैकनीलनाशे
जगदनीलमापद्येत न च नीलसमवायस्यैकत्वसमवाययोरेव विनाशोत्पादविषयकोऽयं प्र
त्यय इति वाच्यं प्रतीत्या समवायानुल्लेखात् न च स एवायं नील इति प्रत्यक्षात् ह्रासवत्त्वे ऐ
क्यमिति वाच्यं प्रत्यक्षस्य तज्जातीयविषयत्वात् सैवेयं गुर्जरीतिवत् लाघवतर्कप्रत्यक्ष
बाधितं अन्यथा पटादीनामप्यैक्यप्रसंगात् उत्पादविनाशबुद्धेः समवायालम्बनापत्तेरि
ति एतेन रसादिकं व्याख्यातं चक्षुर्ग्राह्यविशेषगुण रूपमित्यर्थः एवमग्रेऽपि द्रव्यादेरिति द्र
व्यादेरुपलंभकं उपलब्धिकारणं तच्च रूपमेव बहुत्वादि चक्षुषः सहकारि स्यात् शुक्लादिक
मनेकधा द्रव्यगुणसामान्यानां चाक्षुषप्रत्यक्षं प्रतिऽद्भूतरूपकारणं तच्च रूपं शुक्लनीलर
क्तपीतकर्बुरादिभेदादनेकप्रकारकं भवति ननु कथं कर्बुरमितिरिक्तं रूपं द्रव्यं नीलपी
ताधारब्धोऽवयवी न तावन्नीरूपोऽप्रत्यक्षत्वप्रसंगात् नापि व्याप्यवृत्तिनीलादिकमुत्पद्य

तेव्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वाभावात् नानाजातीयरूपैरवयविनि विजातीयं चित्ररू
पमारभ्यते अत एवैकं चित्ररूपमित्यनुभवः नानारूपकल्पने तु गौरवात् रूपस्य चैव नीलादीनां पी
ताद्यारंभे प्रतिबंधकत्वकल्पनात् अवयविनि नीरूपतापत्तिः एतेन स्पर्शोऽपि व्याख्यातः रसादि
कमपि नाव्याप्यवृत्ति किंतु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः तत्र रस
नयाऽवयवरस एव गृह्यते रसनेंद्रियादीनां द्रव्यग्रहे सामर्थ्याभावात् अवयविनि नीरसत्वे
पि क्षतेरभावात् जलादिपरमाणौ तु नित्यमन्यत्तु हेतुकं जलपरमाणौ तेजःपरमाणौ च रूपं
नित्यं पृथिवीपरमाणुरूपं त्वनित्यं तत्र पाकेन रूपांतरोत्पत्तेः नहि घटस्य पाकानंतरं तदवय
वोऽपक्व उपलभ्यते न हि रक्तकपालस्य कपालिका नीलावयवा भवति एवं क्रमेण परमाणाव
पि पाकसिद्धिः अन्यत्तु जलतेजःपरमाणुरूपभिन्नं रूपं सहेतुकं हेतुजन्यं रसं निरूपयति रसः
स्तु रसनग्राह्यो मधुरादिरनेकधा सहकारी रसज्ञायाः रासनज्ञाने रसः कारणमित्यर्थः नित्यता
दिः च पूर्ववत् जलपरमाणौ रसो नित्यः अन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः गंधं निरूपयति घ्राण
ग्राह्यो भवेद्गंधो घ्राणस्यैवोपकारकः घ्राणजन्यज्ञाने सहकारी स इत्यर्थः सौरभं चासौरभं च स तु ५२

द्वेधापरिकीर्तितं सर्वोऽपि गंधोऽनित्य एव स्पर्शं निरूपयति स्पर्शस्त्वगिंद्रियमात्रग्राह्यः त्वचः स्पर्शानुप
कारकः अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः काठिन्यादि तिनावेव स्पर्शान्तर्भवते
स्पर्शः कारणमित्यर्थः पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः जलस्य शीतः तेजस उष्णः काठि
न्यसुकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः काठिन्यादिकं त्ववयवसंयोगगतो जातिविशेषः चक्षुर्ग्राह्यता
पत्तेः नित्यत्वादि च पूर्ववत् जलतेजोवायुपरमाणुस्पर्शाः नित्याः तद्भिन्नस्पर्शास्त्वनित्या इ
त्यर्थः एतेषां पाकजत्वं त्वाह इतो नान्यत्र कुत्रचित् तत्रापि परमाणोः स्यात् पाको वैशेषिके मते एते
षां रूपरसगंधस्पर्शानां नान्यत्रेति पृथिव्यां हि रूपरसगंधस्पर्शपरावृत्तिः पावकसंयोगादुपलभ्य
ते न हि शतधा विध्मायमाने जले रूपादिकं परावर्तते नीरे सौरभमुत्पन्नं चान्वयव्यतिरेकाभ्यां नुपाध्य
रेवाग्निर्निर्णीयते पाकजपृथिव्याः शीतस्पर्शादिवत् तत्रापि पृथिवीष्वपि मध्ये परमाणावेव रूपादी
नां पाक इति वैशेषिका वदंति तेषामयमाशयः अवयविनावष्टब्धेष्ववयवेषु पाको न संभव
ति परंतु वह्निसंयोगेनावयविषु विनष्टेषु स्वतंत्रेषु परमाणुषु पाकः पुनश्च पक्वपरमाणुसंयोगा
द्व्यणुकादिक्रमेण पुनर्महावयविपर्यंतमुत्पत्तिः तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो

जदितिव्यस्तांतरोत्पत्तिश्चेति अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरूपादिमद्भव
तीतिशिष्यबुद्धिवैशद्याय प्रक्रिया तत्र विभागजविभागानंगीकारे नवक्षणा तदंगीकारे तु विभागः॥
किंचित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्मत्वं स्यात् संयोगविभागयोरनपेक्षकारणं कर्मे
ति हि वैशेषिकसूत्रं स्वोत्तरभाविभावात् सेपक्षं तस्यार्थः अन्यथा कर्मणोप्युत्तरसंयोगजनने पूर्वसं
योगनाशापेक्षणाद ——— त्तिः स्यादिति तत्र यदि द्रव्यारंभकसंयोगविनाशविशिष्टं कालमपेक्ष्य
स्य विभागजविभागः स्यात् तदा दशक्षणा अथ द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजविभागः॥
तदा एकादशक्षणा तथा हि अग्निसंयोगात् परमाणौ कर्म ततः परमाण्वंतरेण विभागः
ततश्चारंभकसंयोगनाशः ततो द्व्यणुकनाशः ततः परमाणौ श्यामादिनाशः ततो रक्ताद्युत्पत्तिः
ततो द्रव्यारंभानुगुणक्रिया ततो विभागः ततः पूर्वसंयोगनाशः ततश्चारंभकसंयोगः ततो द्व्यणुको
त्पत्तिः ततो रूपाद्युत्पत्तिरिति नवक्षणा ननु श्यामादिनाशक्षण एव रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारंभा
नुगुणक्रियास्त्विति चेन्न अग्निसंयुक्ते द्रव्यारंभकपरमाणौ यत्कर्म तन्न विनाशमंतरेण गुणोत्पत्तिर
मंतरेण च तत्र परमाणौ क्रियांतराभावात् कर्मवति कर्मांतरानुत्पत्तेः निर्गुणे द्रव्ये द्रव्यारंभानुगुण ५८

क्रियानन्तरमेव तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न पू
र्वरूपादिध्वंसस्यापि रूपान्तरे हेतुत्वात् अथ दशक्षणात्मसा चारम्भकसंयोगविनाशविशिष्ट
कालमपेक्ष्य विभागेन विभागजनने सति स्यात् तथाहि वह्निसंयोगाद्द्व्यणुकारम्भके परमा
णौ कर्म ततो विभागः तत आरम्भकसंयोगनाशः ततो द्व्यणुकनाशः विभागजविभागो ततः श्याम
नाशः पूर्वसंयोगनाशो ततो रक्ताद्युत्पत्तिरुत्तरसंयोगो ततो वह्निनोदनजन्यपरमाणुकर्मणो
नाशः ततो अदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणक्रिया ततो विभागः ततः पूर्वसंयोगना
शः तत आरम्भकसंयोगः ततो द्व्यणुकोत्पत्तिः अथ रक्तोत्पत्तिः अथैकादशक्षणा व
ह्निसंयोगात् परमाणौ कर्म ततो विभागस्ततो द्व्यारम्भकसंयोगनाशः ततो द्व्यणुकनाशः
ततो द्व्यणुकनाशविशिष्टकालमपेक्ष्य विभागजविभागः श्यामनाशो ततः पूर्वसंयोगनाशरक्तोत्प
त्ती ततः उत्तरदेशसंयोगः ततः परमाणुकर्मनाशस्ततोऽदृष्टवदात्मसंयोगाद्द्व्यारम्भकानुगु
णक्रिया ततो विभागस्ततो पूर्वसंयोगनाशस्ततो द्व्यारम्भकसंयोगस्ततो द्व्यणुकोत्पत्तिः त
तो रक्ताद्युत्पत्तिः मध्यमशब्दवदेकस्मादग्निसंयोगाद्रूपनाशोत्पादौ तावत्काल

मेकस्याप्येरस्थिरत्वात् द्व्यणुकनाशकादेकस्मादित्यर्थः किंचनाशकमेवमपुन्यादेवास्तदानद्वि
पादावपिनाशोरक्तत्वरत्वानस्यात् एवंपरमाण्वंतरेकर्मचिंतनान्नवमादिक्षणेपिगुणोत्पत्तिः ९
तथाहि एकत्रपरमाणौकर्मततोविभागः ततआरंभकसंयोगनाशपरमाण्वंतरकर्मणीततो
द्व्यणुकनाशः परमाण्वंतरकर्मजोविभागश्चेत्येकः कालः ततःश्यामादिनाशोविभागाच्चपू
र्वसंयोगनाशश्चेत्येकःक्षणः ततोरक्तोत्पत्तिः द्रव्यारंभकसंयोगश्चेत्येकःकालः अथद्व्यणु
कोत्पत्तिः ततोरक्ताद्युत्पत्तिरितिपंचक्षणाः द्रव्यनाशसमकालपरमाण्वंतरकर्मचिंतनात्षष्ठे
गुणोत्पत्तिः तथाहिपरमाणुकर्मणापरमाण्वंतरविभागस्ततआरंभकसंयोगनाशस्ततो॰
द्व्यणुकनाशपरमाण्वंतरकर्मणीअथश्यामादिनाशःपरमाण्वंतरकर्मजोविभागश्चततो
रक्तोत्पत्तिः परमाण्वंतरेपूर्वसंयोगनाशश्चततःपरमाण्वंतरसंयोगस्ततोद्व्यणुकोत्पत्तिरथ
रक्तोत्पत्तिरितिश्यामनाशात्क्षणेपरमाण्वंतरेकर्मचिंतनात्सप्तक्षणा तथाहिपरमाणौकर्म ५९
ततःपरमाण्वंतरविभागः ततःआरंभकसंयोगनाशः ततोद्व्यणुकनाशः ततःश्यामादिना
शपरमाण्वंतरकर्मणीततोरक्तोत्पत्तिः परमाण्वंतरकर्मजविभागश्चततःपरमाण्वंतरे

पूर्वसंयोगनाशः ततउत्तरदेशसंयोगः ततोद्व्यणुकोत्पत्तिः ततस्त्र्यणुकाद्युत्पत्तिः एवंसृष्ट्युत्पत्तिसम
कालेपरमाणौतदेवकर्मचिंतनादस्यस्ताणोतथाद्वियम्मारंभकमेतत्ततःपरमाण्वन्तरविभागःतत
आरंभकसंयोगनाशः ततोद्व्यणुकनाशः ततस्त्र्यणुकनाशः ततोरक्तोत्पत्तिपरमाण्वन्तरकर्म
णी ततःपरमाण्वन्तरकर्मजविभागः ततःपूर्वसंयोगनाशः ततःपरमाण्वन्तरसंयोगःततो
द्व्यणुकोत्पत्तिः अपरकोत्पत्तिरिति नैयायिकानांतुनयेद्व्यणुकादावपीष्यते नैय्यायि
कमतेद्व्यणुकादावावयविनाशपिपाकोभवति तेषामयमाशयः अवयविनांसच्छिद्रत्वा
द्वह्नेःसूक्ष्मावयवैरंतःप्रविष्टैः अवयवेषुवस्थ्येपिपाकोनविरुध्यते अनंतावयवत
नाशावकल्पनेगौरवंच इत्थंचसोयंघटइतिप्रत्यभिज्ञापिसंगच्छते यत्रतुनप्रत्यभिज्ञा
तत्रावयविनाशोपिस्वीक्रियतेइति संख्यांनिरूपयितुमाह गणनव्यवहारेतुहेतुःसं
ख्याभिधीयते नित्येषुनित्यमेकत्वमनित्येऽनित्यमिष्यते गणनव्यवहारासाधार
णंकारणंसंख्येत्यर्थः नित्येषुपरमाण्वादिषुएकत्वंनित्यमनित्येघटादौएकत्वम
नित्यमित्यर्थः द्वित्वादयःपरार्धांताअपेक्षाबुद्धिजामताः द्वित्वादयोव्यासज्यवृत्ति

न्या॰ मु॰
टी॰ ९॰

60

संख्यापेक्षाबुद्धिजन्याः अनेकाश्रयपर्याप्ता एतास्तु परिकीर्तिताः पर्याप्तिर्द्वित्वादिसमवायः प्रत्येकं
घटादावपि वर्त्तते तथापि एको द्वाविति प्रत्ययाभावादेको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्या
प्तिलक्षणः कश्चित्सम्बन्धोऽनेकाश्रयोऽभ्युपेयते अपेक्षाबुद्धिनाशाच्च तेषां नाशो निरूपितः १
प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिस्ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पकात्मकं ततो द्वित्वत्व
विशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च ततो द्वित्वनाशः इति यद्यपि ज्ञानत्वद्वित्वत्वमात्रस्यापि योग्य
विभुविशेषगुणानां स्वानन्तरवर्त्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वक
ल्पनेऽन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशात्तदनन्तरं द्वित्वस्यैव नाशः स्यान्न तु द्वित्व
प्रत्यक्षं तदानीं विषयाभावात् विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात् तस्माद्द्वित्वप्र
त्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते न चापेक्षाबुद्धिनाशात्कथं द्वित्वनाश इति वाच्यम् १
कालान्तरे द्वित्वप्रत्यक्षाभावादपेक्षाबुद्धिस्तदुत्पादिका तन्नाशात् तन्नाशकल्पनात् अत ९॰
एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यते इति कल्प्यते न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षे का
रणत्वमस्त्विति वाच्यं लाघवेन द्वित्वप्रत्यक्षे कारणत्वस्योचितत्वात् अतीन्द्रिये द्व्यणुकादावपे

त्वाबुद्धिर्योगिनां अतीन्द्रियसर्गादिकालीनद्व्यणुकादौ ईश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तर्वर्ति-
योगिनां अपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति अपेक्षाबुद्धिकेत्यत आह अनेकैकत्वबुद्धि-
र्यासापेक्षाबुद्धिरिष्यते अयमेकः अयमेक इत्याकारिकेत्यर्थः परिमाणं निरूपयति परि-
माणं भवेन्मानव्यवहारस्य कारणं अणुदीर्घं महत्त्वं ह्रस्वमिति तद्भेद ईरितः परिमाण-
ति परिमितिव्यवहारासाधारणकारणं परिमाणमित्यर्थः तच्चतुर्विधं अणु महद्दीर्घं ह्र-
स्वं च अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतं संख्यातः परिमाणाच्च प्रचयादपि जा-
यते तत्राणुत्वह्रस्वत्वे च समनियते महत्त्वदीर्घत्वे च समनियते तत्परिमाणविशेषमित्यत्र-
परिमाणमित्यनुषज्यते जायत इत्यत्रापि परिमाणमित्यनुवर्तते अनित्यमिति पूर्वेणान्वि-
तं तथा चानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः तत्र संख्याजन्य-
मुदाहरति अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतं द्व्यणुकस्य त्रसरेणोश्च परिमाणं
प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्ट-

परिमाणजनकत्वात् द्व्यणुकपरिमाणं तु परमाणुपरिमाणापेक्षया नोत्कृष्टं त्र्यसरेणुपरिमाणेन
सजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्र्यसरेणुपरिमा
णस्यासमवायिकारणमित्यर्थः परिमाणजन्यपरिमाणमुदाहरति परिमाणं घटादौ तु प
रिमाणजमुच्यते घटादिपरिमाणं कपालादिपरिमाणजन्यं परिमाणमात्रजन्यं कपाला
दिपरिमाणमात्रजन्यमित्यर्थः प्रचयजन्यमुदाहरन्तु प्रचयं निर्वक्ति प्रचयः शिथिलाख्यो
यः संयोगस्तेन जन्यते परिमाणं तूलकादौ नाशस्त्वाश्रयनाशतः सर्वपरिमाणस्य प
यत्यं निरूपयति संख्यावत्तु पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम् पृथक्प्रत्ययासाधार
णकारणं पृथक्त्वं तन्नित्यत्वादिकं संख्यावत् यथा नित्येष्वेकत्वं नित्यमनित्येष्वनित्यं
मनित्यमेकत्वं तु आश्रयद्वितीयक्षणोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथ
क्त्वमपि द्वित्वादिवत् द्विपृथक्त्वादिकमपीत्यर्थः ननु अस्मात् पृथगित्यादावन्योन्याभा
वो भासते तेन तत्त्वाय पृथक्त्वं गुणान्तरं स्वीक्रियते न चास्तु पृथक्त्वं न तु अन्योन्याभाव इति वाच्यं ६१

रूपेण घट इति प्रतीत्यनापत्तेः नहि रूपे घटावधिकं पृथक्त्वं गुणांतरमस्ति न वा घटे रूपावधिकं पृथक्त्वम
स्ति येन परंपरासंबंधः कल्प्येत इत्यतस्तस्मात् अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते अस्मा
त्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ननु शब्दैर्वैलक्षण्यमेव न त्वर्थवैलक्षण्यमिति चेन्न वि
नार्थभेदं शब्दभेदात् पृथगिति वत् भेदेनेत्यत्रापि पंचमीप्रसंगात् तस्माद् घटः पटे पृथगेव पंचमी
सार्थे न जयान्योन्याभावतो भिन्नो यतु गुणांतरं कल्प्यत इति संयोगं निरूपयति अप्राप्तयोस्तु
या प्राप्तिः सैव संयोग ईरितः तं विभजते कीर्तितस्त्रिविधोह्यसौ आद्योन्यतरकर्मोत्थः तथो
भयस्पंदजन्यो भवेत् संयोगजोऽपरः आदिमः श्येनशैलादिसंयोगः परिकीर्तितः मेषयोः
सन्निपातो यः स द्वितीय उदाहृतः कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः तृतीयः स्यात्
कर्मजोऽपि द्विधैव परिकीर्तितः अभिघातो नोदनं च शब्दहेतुरिहादिमः शब्दाहेतुर्द्विती
यः स्यात् एषः संयोगः सन्निपातः संयोगः द्वितीयः उभयकर्मजः तृतीय इति संयोगजसं
योग इत्यर्थः तृतीयः स्यादिति पूर्वेणान्वितः आदिमः अभिघातः द्वितीयो नोदनाख्यः

संयोग इति विभक्तप्रत्ययासाधारणकारणं विभागस्तं निरूपयति विभागोपि त्रिधा भवेत् एककर्मोद्भ
वस्त्वाद्ययोर्द्वयोः कर्मोद्भवोपरः विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत् हेतुमात्रविभागो
त्थो हेत्वहेतुविभागजः उदाहरणं श्येनशैलविभागादिकं पूर्ववद्बोध्यं तृतीयो विभागजविभागः
कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति द्विविधः आद्यस्तावद्घटे कपाले
कर्म ततः कपालद्वयविभागस्ततो घटारंभकसंयोगनाशस्ततो घटनाशस्ततस्तेनैव कपालवि
भागेन सकर्मणः कपालस्याकाशविभागो जन्यते ततस्तद्देशसंयोगनाशस्तत उत्तरदेशसं
योगस्ततः कर्मनाश इति न च तेनैव कर्मणा देशांतरविभागः कथं न जन्यत इति वाच्यं एक
स्य कर्मणः आरंभकसंयोगप्रतिद्वंद्विविभागजनयेत् तदारंभकसंयोगप्रतिद्वंद्विविभाग
न जनयेत् न च कारणविभागेनैव पूर्वक्लृप्तेन देशांतरविभागो जन्यतामिति वाच्यं आरंभकसं
योगप्रतिद्वंद्विविभागेनावयवस्य सति द्रव्ये देशांतरविभागासंभवात् द्वितीयस्तावत् यत्र च
हस्तक्रियया हस्ततरुविभागस्ततः शरीरेपि विभक्तप्रत्ययो भवति तत्र च शरीरतरुविभागे

हस्तक्रियानकारणं व्यधिकरणत्वात् शारीरे तु क्रियानास्ति अवयविकर्मणो यावदवयव
कर्म्मनियतत्वात् अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति अ
तएव विभागो गुणान्तरं अन्यथा शरीरे विभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो
नान्यथासिद्धः परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति परत्वञ्चापरत्वञ्च द्वि
विधं परिकीर्त्तितं दैशिकं कालिकं चेति मूर्त्तएव तु दैशिके परत्वं मूर्त्तसंयोगभूयस्त्व
ज्ञानतो भवेत् अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितं दैशिकपरत्वं बहुतरमूर्त्तसंयो
गान्तरितत्वज्ञानादुत्पद्यते एवं तदल्पीयस्त्वज्ञानादपरत्वे अत्रावधित्वार्थे पञ्चम्यापर
त्वाय यथा पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः पाटलिपुत्रात् कुरुक्षेत्रमपेक्ष्य प्रयागो
ऽपर इति तत्रासमवायी स्यात् दिक्संयोगस्तदाश्रये तयोर्दैशिकपरत्वापरत्वयोरस
मवायिकारणं तदाश्रये दैशिकपरत्वापरत्वाश्रये दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो
भवेत् परत्वमपरत्वं तु तस्य चाल्पत्वबुद्धितः अत्र परत्वमपरत्वञ्च कालिकं व्याख्यायन्त

न्या॰ मु॰
टी॰ ६२

63

यं परिस्पंदोपेक्षायां यस्य सूर्यपरिस्पंदोधिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः कालिकपर
त्वापरत्वे जन्यद्रव्य एव अत्र स्वसमवायिस्यात्संयोगः कालपिण्डयोः अपेक्षाबुद्धिनाशे
न नाशस्तयोरुदाहृतः अत्र कालिकपरत्वापरत्वयोः तेषामिति तेषां कालिकदैशि
कपरत्वापरत्वानां क्रमप्राप्तां बुद्धिं निरूपयति बुद्धेः प्रपंचः प्रागेव प्रायशो विनिरूपितः
अथावशिष्टोप्यपरः प्रकारः परिदर्श्यते अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते त
त्राप्रमां निरूपयति तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता तत्प्रपंचो विपर्या
सः संशयोपि प्रकीर्तितः तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः तत्प्रपंचः अप्र
माप्रपंचः आद्यो देहेष्वात्मबुद्धिः शंखादौ पीततामतिः भवेन्निश्चयरूपा या आद्य इति ६२
विपर्यास इत्यर्थः शरीरादौ निश्चयरूपं यत् आत्मत्वप्रकारकं ज्ञानं गौरोहमित्याद्याका
रकं एवं शंखादौ पीतः शंखः इत्याकारकं ज्ञानं निश्चयरूपं तद्भ्रम इत्यर्थः संशयोप्यथ
दर्श्यते किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः किंस्विदिति वितर्के निश्चयस्यल

लणमाह तदभावाप्रकाराधीस्तत्प्रकारानुनिश्चयः तदभावाप्रकारकंतत्प्रकारकंज्ञानं
निश्चयइत्यर्थः संशयं लक्षयति ससंशयोयमनिर्धारःस्यादेकत्राभावभावयोः एवधर्मि
कविरुद्धभावाभावप्रकारकंज्ञानंसंशयइत्यर्थः साधारणादिधर्मस्यज्ञानंसंशयकारकं
उभयसाधारणोयोधर्मस्तज्ज्ञानंसंशयकारणं यथोच्चैस्तरत्वंपुरुषस्थाणुसाधारणंज्ञा
त्वायंस्थाणुर्नवेतिसंदिग्धे एवमसाधारणधर्मज्ञानमपिकारणं यथाशब्दत्वंनित्यानि
त्यव्यावृत्तमपिशब्देगृहीत्वाशब्दोनित्योनवेत्यादिसंदिग्धे विप्रतिपत्तिस्तुशब्दोनित्यो
नवेत्यादिशब्दात्मिकानसंशयकारणंशाब्दव्याप्तिज्ञानादीनांनिश्चयमात्रजनकत्व
स्वाभाव्यात् किंतुतत्रशब्देनकोटिद्वयज्ञानंजन्यते संशयस्तुमानसएवेति एवंज्ञानेप्र
माणसंशयाद्विषयसंशयः एवंव्याप्यसंशयाद्व्यापकसंशयइत्यादिकंबोध्यं किंतुसंशयेध
र्मिज्ञानंधर्मीन्द्रियसन्निकर्षोवाकारणमिति दोषोप्रमायाजनकः प्रमायास्तुगुणोभवेत्
अप्रमांप्रतिदोषःकारणंप्रमांप्रतितुगुणःकारणंतत्रपित्तादिरूपादोषाश्चाननुगतास्तेषां
कारणत्वमन्वयव्यतिरेकादेवसिद्धंगुणस्यप्रमाजनकत्वंत्वनुमानात्सिद्धंयथाप्रमाज्ञानं

सामान्यकारणभिन्नकारणजन्याजन्यत्वज्ञानत्वात्स्वप्रमावत् नचदोषाभावमेवकारणमस्ति
तिवाच्यं पीतः शंख इतिज्ञानस्थलेपित्तदोषसमाकृष्टत्वेप्रमात्वनुत्पत्तिप्रसंगात् विनिग
मनाविरहात् नूनंदोषाभावकारणत्वमपेक्ष्यगुणकारणताया न्याय्यत्वाच्च नचगुणसत्वे
पिपित्तप्रतिबंधात्कथंचिन्नैवस्यस्थाने अतः पित्तादिदोषाभावानांकारणत्वमवश्यंवा
च्यं तथाचकिंगुणस्यहेतुत्वकल्पनयेतिवाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापिहेतुत्व
सिद्धेः एवंभ्रमेप्रतिगुणाभावः कारणमित्यस्यापिसंभवत्वात् अत्रदोषाः के इत्याकांक्षा
यामाह पित्तदूरत्वादिरूपोदोषोनानाविधोमतः क्वचित्पीतादिभ्रमेपित्तदोषः क्वचि
च्चंद्रादेःस्वल्पपरिमाणग्रहेदूरत्वदोषः क्वचिद्वंशोरगभ्रमेमंडूकवसांजनंदोषः इत्येवं
रूपादोषाः अननुगतातएवभ्रांतिजनकाइत्यर्थः अथैकगुणाइत्याकांक्षायां प्रत्यक्षा
दिप्रमायांक्रमेणगुणान्प्रदर्शयति प्रत्यक्षेतुविशेष्येणविशेषणवतासमं सन्नि
कर्षोगुणस्तुस्यादथत्वनुमितौपुनः पक्षेसाध्यविशिष्टेतुपरामर्शोगुणोभवेत् शक्ये
सादृश्यबुद्धिस्तुभवेदुपमितौगुणः शाब्दबोधेयोग्यतायास्तात्पर्यस्याथवाप्रमा गु

णः स्यात् अन्यदा विशेषणवद्विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्यवा
प्यत्ववैशिष्ट्यज्ञानं गुणः एवमग्रेऽपि ज्ञेयं प्रमां निरूपयति भ्रमभिन्नं तु ज्ञानमत्रोच्यते
प्रमा ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं ज्ञाने तत्र रजतांशे प्रमा न स्यात् तज्ज्ञा
नस्य भ्रमभिन्नत्वाभावात् अत आह अथवा तत्प्रकारकं यज्ज्ञानं तद्विशेष्यकं तत्प्रमान
प्रमानापि भ्रमः स्यान्निर्विकल्पकं प्रकारतादिशून्यं हि संबंधानवगाहि तत्र प्र
मात्वेन स्वतो ग्राह्ये संशयानुपपत्तेः तद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमे
त्यर्थः अथैवमस्मृतेरपि प्रमात्वं स्यात् ततः किमिति चेत् तथा सति तत्करणस्य प्र
माणत्वं स्यादिति चेन्न यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् १
इदं तु बोध्यं येन संबंधेन यद्वत्ता तेन संबंधेन तद्विशेष्यकत्वे तेन संबंधेन तत्प्रका
रकं वाच्यं तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः एवं सति निर्विक
ल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावात् अत आह न प्रमेति ननु इदं कापि

न्या॰ सू॰
टी॰ ६५

65

संयोगज्ञानं भ्रमः स्यादिति चेन्न प्रतियोगिव्यधिकरणकपिसंयोगाभाववति कपि
संयोगिभेदवति वा संयोगज्ञानस्य भ्रमत्वात् नच कपिसंयोगानवच्छेदकावच्छेदेन सं
योगज्ञाने भ्रमो न स्यात् तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वात् इति
वाच्यं तत्र संयोगानवच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् तत्त्वस्याननुग
मात्तत्त्वरूपाननुगमेऽपि न क्षतिः प्रमात्वमिति मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति
वदन्ति तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशत्वात् ज्ञानप्रमाण्येनैव गृह्यत इति भ
ट्टानां मते तु ज्ञानमतीन्द्रियं ज्ञानजन्यज्ञाततया प्रत्यक्षज्ञाततया च ज्ञानमनुमीयते
मुरारिमिश्राणां मते अनुव्यवसायेन ज्ञानं गृह्यते सर्वेषां हि मते तद्ज्ञानविषयक
ज्ञानेन तज्ज्ञानप्रमाण्यं गृह्यते विषयनिरूप्यं हि ज्ञानं अतो ज्ञानवित्तिवेद्यो विषयः (६५
तन्मतं दूषयति न स्वतो ग्राह्यमिति संशयादिति यदि ज्ञानप्रमाण्यं स्वतो ग्राह्यं स्यात्
तदा अनभ्यासदशायां ज्ञाने प्रामाण्यसंशयो न स्यात् तत्र हि यदा ज्ञानं तदा तत्संशये

प्रामाण्यं ज्ञातमेवेति कथं संशयः यदि तु ज्ञानं न ज्ञातं तर्हि धर्मिज्ञानाभावात् कथं संशयः
तस्माद्धाने प्रामाण्यमनुपेयं तथा हि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् इ
दं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गंधवति पृथिवीत्वप्रकारकज्ञानत्वात् एवं इदं ज
लत्वप्रकारकं ज्ञानं प्रमा स्नेहवति जलत्वप्रकारकज्ञानत्वात् नच हेतुज्ञानं कथं
ज्ञातमिति वाच्यं पृथिवीत्वप्रकारकत्वस्य स्वतो ग्राह्यत्वात् तत्र गंधग्रहे गंधवद्वि
शेष्यकत्वस्यापि सुग्राहत्वात् तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वेपरं न गृह्यते संश
यानुरोधात् ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं
व्यर्थं नच रंगे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या तस्याप्येवमतो भ्रमस्याभावादिति वाच्यं
तत्र दोषाधीनस्य पुरोवर्तिनि स्वतंत्रोपस्थित रजतभेदाग्रहस्य हेतुत्वात् सत्यरज
तस्थले तु विशिष्टज्ञानस्य सत्त्वात्तदेव कारणं अस्तु वा तत्रापि भेदाग्रहः स एव का
रणमिति नचान्यथाख्यातिः संभवति रजतप्रत्यक्षकारणस्य रजतेन्द्रियसन्निक
र्षस्याभावात् ॥

न्या॰ सू॰
टी॰ ६६

66

रंगेरजतबुद्धेरनुपपत्तिरितिचेन्न सत्यरजतस्थलेप्रवृत्तिंप्रतिविशिष्टज्ञानस्यहेतुतायाः
क्लृप्तत्वात् अन्यथापितत्कल्पनात् नचसंवादिप्रवृत्तौतत्कारणंविसंवादिप्रवृत्तौतु
भेदाग्रहःकारणमितिवाच्यं लाघवेनप्रवृत्तिमात्रेतस्यहेतुत्वकल्पनात् इत्थंचरंगे
रजतत्वविशिष्टबुद्ध्यनुरोधेनज्ञानलक्षणाप्रत्यासत्तिकल्पनेपिनक्षतिः फलमुखगौ
रवस्यादोषत्वात् किंचपुरःरंगरजतयोरिमेरजतेरंगेचेतिज्ञानेतत्रनकारणबाधोपि
अपिचपुरःरंगरजतयोरिमेरजतेरंगेइतिज्ञाने तत्रोभयत्रयुगपत्प्रवृत्तिनिवृत्ती-
स्यातां रंगेरंगभेदाग्रहेरजतेरजतभेदाग्रहेचान्यथाख्यातिभयात् तन्मतेरंगेरंगभे
दाग्रहस्यरजतेरजतभेदाग्रहस्यचसत्त्वात् दोषादेवरंगेरजतभेदाग्रहस्यचसत्त्वात्
किंचानुमितिप्रतिभेदाग्रहस्यहेतुत्वेजलह्रदेवह्निव्याप्यधूमवद्भेदाग्रहादनुमि- ६६
तिर्निराबाधा यदिचविशिष्टज्ञानेकारणंतदाअयोगोलकेवह्निव्याप्यधूमज्ञानम
नुमित्यनुरोधादापतितं इत्थंचान्यथाख्यातौप्रत्यक्षमेवप्रमाणं रंगरजततयाज्ञा

नामीत्यनुभवादितिसंक्षेपः पूर्वंव्याप्तिरुक्तातद्ग्रहोपायस्तुनदर्शितइत्यतस्तंदर्शयति।
व्यभिचारेति व्यभिचारस्याग्रहोथसहचारग्रहस्तथा हेतुर्व्याप्तिग्रहेतर्कःक्वचिच्छंका
निवर्तकः व्यभिचाराग्रहःसहचारग्रहश्चव्याप्तिग्रहेकारणमित्यर्थः व्यभिचारग्रहस्य
व्याप्तिग्रहेप्रतिबंधकत्वात्तदभावः कारणमेवमन्वयव्यतिरेकाभ्यांसहचारज्ञानस्या
पिहेतुता भूयोदर्शनेनतुनकारणंव्यभिचारस्यास्फूर्तौसकृद्दर्शनेपिक्वचिद्व्याप्तिग्र
हात् क्वचिद्व्यभिचारशंकाविधूननद्वाराभूयोदर्शनमुपयुज्यते यत्रतुभूयोदर्शना
दपिशंकानापैति तत्रविपक्षेबाधकतर्कोपेक्षितः तथाहि वह्निविरहेपिधूमः
स्यादितिशंकाभवेत् तदासौवह्निधूमयोःकार्यकारणभावप्रतिसंधानान्निवर्तते।
यद्ययंवह्निमान्नस्यात्तदाधूमवान्नस्यात् कारणंविनाकार्यानुत्पत्तेः यदिचक्वचि
त्कारणंविनापिभविष्यति अहेतुकएवचभविष्यति इतितत्राप्याशंकाभवति तदा
साव्याघातादपसारणीया यदिकारणंविनाकार्यंस्यात्तदावह्नेर्धूमार्थंतृप्त्यर्थंभोज

व्या॰मु॰
टी॰ ६७

67

नस्यवाभिप्रममतद्ऽप्रादानंतथैवनस्यादिति यत्रस्वतनएवशोकाभावनरतिनतत्रनतत्वोपे
क्षापीतितन्टितमुक्तेतकेऽक्वचिल्कुकानिवर्तकइति इदानीमुपाधिंनिरूपयति साध्य
स्येति साध्यस्यव्यापकोयस्तुहेतोरव्यापकस्तथा सउपाधिर्भवेत्तस्यनिष्कर्षोयंप्रदर्श्यते
साध्यत्वाभिमतव्यापकत्वेसतिसाधनत्वाभिमताव्यापकइत्यर्थः ननुश्यामत्वेमित्रातनय
त्वादित्यत्रशाकपाकजत्वेनोपाधिःस्यान्नस्यसाध्यव्यापकत्वाभावात् श्यामत्वस्यघटा
दावपिसत्वात्तत्रशाकपाकजत्वाभावात् एवंवायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वादि
त्यत्रोद्भूतरूपेणोपाधिःस्यात् प्रत्यक्षत्वस्यात्मादावपिसत्वात्तत्रचरूपाभावात् एवंध्व
सोविनाशीजन्यत्वादित्यत्रभावत्वेनोपाधिःस्यात् विनाशित्वस्यप्रागभावेपिसत्वात्
तत्रभावत्वाभावादितिचेन्न यद्धर्मावच्छिन्नसाध्यव्यापकत्वंतद्धर्मावच्छिन्नसाधना ६७
व्यापकत्वमित्यर्थेतात्पर्यात् मित्रातनयत्वावच्छिन्नश्यामत्वस्यव्यापकंशाकपाकज
त्वे एवमुद्भूतरूपं बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकंबहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्याप

तंच श्यवंधेसोविनाशीजन्यत्वादित्यत्रजन्यत्वावच्छिन्नसाध्यव्यापकंभावत्वं मुद्गरैनोनुपलादृशा
धर्मोनास्तियदवच्छिन्नसाध्यस्यव्यापकत्वंतदवच्छिन्नस्यसाधनस्याव्यापकंकश्चिन्नत्वात् व्य
भिचारित्वान्नउपाध्यधिकरणंयत्साध्याधिकरणं यत्रउपाधिस्तत्त्वं साध्यव्यभिचारित्वमित्यप
वत्त्वमधिकरणं अतनत्सतदन्यतरत्वावच्छिन्नस्यसाध्यस्यव्यापकत्वंसाधनाव्यापकत्वंमु
पाधेः संभवतीति अतएवलक्षणमपिउपाधिस्वरूपमेतदनुसारेणदर्शयति सर्वेत्यादिना
सर्वेसाध्यसमानाधिकरणाः स्युरुपाधयः हेतोरेकाश्रयेयेषांस्वसाध्यव्यभिचारिता स्व
साध्येति स्वउपाधिः स्वंचसाध्यंचस्वसाध्ये तयोर्व्यभिचारितेत्यर्थः उपाधेर्दूषकताबीज
माह व्यभिचारस्येति व्यभिचारस्यानुमानमुपाधेस्तुप्रयोजनं उपाधिव्यभिचारेणहेतोः
साध्यव्यभिचारानुमानमुपाधेःप्रयोजनमित्यर्थः तथाहियत्रशुद्धसाध्यव्यापकउपाधि
स्तत्रशुद्धेनैवोपाधिव्यभिचारेण साध्यव्यभिचारानुमानंयथाधूमवान्वह्नेरित्यादौवह्निर्धू
मव्यभिचारीआर्द्रेन्धनव्यभिचारात् इतिव्यापकव्यभिचारेणोव्याप्यव्यभिचारावश्यक
त्वात् ॥

यत्र किंचिद्धर्मावच्छिन्नसाध्यव्यापक उपाधिस्तत्र तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचा
रानुमानं यथा स श्यामो मित्रातनयत्वादित्यादौ मित्रातनयत्वे श्यामत्वव्यभिचारि गौरमित्रा
तनये शाकपाकजत्वव्यभिचारित्वादिति बाधान्नीतपक्षेतरस्तु साध्यव्यापकताग्राह
कप्रमाणाभावात् स्वव्याघातकत्वाच्च नोपाधिः बाधोन्नीतस्तु उपाधिर्भवत्येव वह्निर
नुष्णः कृतकत्वात् इत्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहे वह्नीतरत्वमुपाधिः यस्य त्वपाधेः स
साध्यव्यापकत्वादिकं संदिग्धं स संदिग्धोपाधिः पक्षेतरस्तु संदिग्धोपाधिरपि नोद्भा
वनीयः कथकसंप्रदायानुरोधादिति केचित् सत्प्रतिपक्षोत्थापकत्वमुपाधेः फलं तथाहि
अयोगोलकं धूमवत् वह्नेरित्यादौ अयोगोलकं धूमाभाववत् आर्द्रेन्धनाभावादिति सत्
प्रतिपक्षसंभवात् इत्थं च साधनव्यापकोऽपि कश्चिदुपाधिः यथा करका पृथिवी कठि ६८
नसंयोगवत्वादित्यादौ अनुष्णाशीतस्पर्शवत्त्वं नचात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम्
सर्वत्रोपाधेर्दूषणान्तरसंपर्कात् तत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरित्याहुः शाब्दोपमा

नयोरिति शाब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते अनुमानगतार्थत्वादिति वैशेषिकं
मतं वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणे शाब्दोपमानयोरनुमानविधयैव प्रा
माण्यं तथाहि दंडेन गामानयेति लौकिकपदानि यजेतेति वैदिकपदानि वा तात्पर्य
विषयस्मारितपदार्थसंसर्गवंतः योग्यतादिमत्त्वे दोषस्यापितत्वात् तादृशपदा
र्थवत् दृष्टांते दृष्टांतेन साध्यसिद्धिरिति एवं गवयव्यक्तिं प्रत्याप्तानंतरं गवयपदं
गवयत्वप्रवृत्तिनिमित्तकं प्रवृत्तिनिमित्तांतरे वृद्धैस्तत्र प्रयुज्यमानत्वात् असति हेत्वंतरे
वृद्धैर्यत्र प्रयुज्यते तत्र तत्प्रवृत्तिनिमित्तकं यथा गोपदं गोत्वप्रवृत्तिनिमित्तकं यद्वा गव
यपदं तत्प्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पदार्थमेतावता गवयत्वप्रवृत्ति
निमित्तकत्वं सिध्यति तन्मतं दूषयति तन्न सम्यगिति तन्न सम्यक् विना व्याप्तिबोध
शब्दादिबोधतः व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभाविकत्वात् नहि सर्वत्र शाब्दस्य
वणानंतरं व्याप्तिज्ञाने प्रमाणमस्तीति किं च सर्वत्र शाब्दस्थलेपि हि व्याप्तिज्ञानं कल्पने

न्या॰ मु॰
टी ६९
69

तदासर्वत्रानुमितिस्थलेपरामर्शेकल्प्यमानेव्याप्तिबोधएवकिंनस्वीक्रियते इतिद्वैविध्य(
मिति द्वैविध्यमनुभवसिद्धमित्यन्वयव्यतिरेकात्ः अन्वयव्याप्तिःकेवलव्यतिरेकादप्याख्यायते ॥
अनुमानंत्रिविधम् केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् तत्रासद्विपक्षः
केवलान्वयियथाइदमभिधेयंप्रमेयत्वादित्यादौतत्रहिसर्वस्यैवाभिधेयत्वात् विपक्षा
सत्वं असत्सपक्षः केवलव्यतिरेकी पृथिवीतरेभ्योभिद्यतेगंधवत्वादित्यादौ तत्रज
लादित्रयोदशभेदस्यपूर्वमसिद्धत्वान्निश्चितसाध्यवतः सपक्षस्याभावः सतिसपक्ष
विपक्षेऽन्वयव्यतिरेकीयथावह्निमान्धूमादित्यादौ तत्रसपक्षस्यमहानसादेर्विपक्ष
स्यजलह्रदादेश्चसत्वादिति नन्वत्रहिव्यतिरेकिणिव्यतिरेकिव्याप्तिज्ञानंकारणंतदर्थंव्य
तिरेकव्याप्तिंनिर्वक्ति साध्याभावेति साध्याभावव्यापकत्वेहेत्वभावस्ययद्भवेत् साध्या ६९
भावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः तत्रेदंबोध्यं येनसंबंधेनयत्रयेनरूपे
णव्यापकतागृह्यतेतत्संबंधावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाववत्ताज्ञानात्

यत्संबंधेन यदवच्छिन्नं प्रति व्यापकता गृह्यते तत्संबंधावच्छिन्नप्रतियोगिताकत
द्धर्मावच्छिन्नाभावस्यासिद्धिः इत्थं च यत्रेतरत्वव्यापकत्वं गंधाभावे गृह्यते तत्र गं
धाभावाभावेनेतरत्वस्यात्यंताभावः सिद्ध्यति यत्र तु तादात्म्यसंबंधेनेतरव्यापकता
गंधाभावस्य गृह्यते तत्र तादात्म्यसंबंधेनेतरस्याभावः सिद्ध्यति स एवान्योन्याभा
वः एवं यत्र संयोगसंबंधेन धूमं प्रति संयोगसंबंधेन वह्नेर्व्यापकता गृह्यते तत्र
संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावेन जलह्रदे संयोगसंबंधावच्छि
न्नप्रतियोगिताकधूमाभावः सिद्ध्यति अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकस
हचारज्ञानं कारणं केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते न तु व्य
तिरेकव्याप्तिज्ञानं कारणं यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकीत्यु
५ च्यते साध्यप्रसिद्धिस्तु घटादावेव जायते पश्चात्पृथिवीत्वावच्छेदेन साध्यतद्वतिव
दंति अर्थापत्तिरिति अर्थापत्तिस्थले नैव हि प्रमाणांतरमिष्यते व्यतिरेकिव्याप्तिबुद्ध्याव

न्या॰ मु॰
टी॰ ३०
70

मितार्थापत्तिसापत्तः अर्थापत्तिप्रमाणान्तरं केचन मन्यंते तथाहि यत्र देवदत्तस्य शत
वर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीवितो गृहासत्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीवि
त्वान्यथानुपपत्त्या बहिःसत्वं कल्प्यते तदप्यनुमानेन गतार्थत्वान्नेष्यते तथाहि यत्र जी
वितस्य बहिःसत्वं गृहसत्वाद्यतिरेक्याप्यत्वं गृहीतं तथा च्यतरसिद्धो जायमानायां गृहसत्व
बाधात् बहिःसत्वमनुमितो भासते एवं पीनो देवदत्त इत्यादौ पीनत्वस्य भोजनव्याप्यत्वाव
गमाद्भोजने सिद्धे दिवाभोजनबाधे रात्रिभोजनं सिध्यति चेष्टापि न प्रमाणान्तरं तस्याः सं
केतग्राहकत्वात् स्मारकत्वेन लिप्याहि समशीलत्वात् तत्रैवान्तर्भावात् यदि तव्याप्त्यादि
ग्रहस्तदानुमितिरेवेति सुखं निरूपयति सुखं त्विति सुखं तु जगतामेव काम्यं धर्मेण
जन्यते काम्यं अभिलाषविषयः धर्मेति धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः
दुःखं निरूपयति अधर्मेति अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसां अधर्मत्वेन दुः
खत्वेन कार्यकारणभावः प्रतिकूलेति दुःखत्वज्ञानात् सर्वेषां स्वाभाविकद्वेषविष
यत्वमर्थः ॥ ३०

इच्छां निरूपयति निर्दुःखेति निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जन्यते इच्छा तु तदुपाये
स्यादिष्टोपायत्वधीर्यदि इच्छा फलविषयिण्युपायविषयिणी वा फलं सुखं दुःखाभावश्च तत्र
फलेच्छां प्रति फलज्ञानं कारणं अत एव पुरुषार्थः संभवति यज्ज्ञाते सत्स्ववृत्तितयेष्यते इतरे
च्छानधीनेच्छाविषयत्वं फलत्वमित्यर्थः उपायेच्छां प्रति इष्टसाधनताज्ञानं फलेच्छा च कारणं चिकी
र्षेति चिकीर्षां प्रति साध्यत्वप्रकारेच्छाजन्यया भवेत् तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्
बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणी
इच्छा चिकीर्षा पाकं कृत्या साधयामीति तदनुभवात् चिकीर्षां प्रति कृतिसाध्यताज्ञानं इ
ष्टसाधनताज्ञानं च कारणं अत एव वृष्ट्यादौ कृतिसाध्यताभावान्न चिकीर्षा बलव
द्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकं अतो मधुविषसंपृक्तान्नभोजने न चिकीर्षा ब
लवद्द्वेषः प्रतिबन्धक इत्यन्ये तद्धेतुरेवेति तद्धेतुत्वबुद्धिस्तु हेतुत्वं वा स्यादिति मते ब
लवदनिष्टजनकत्वज्ञानं कारणमित्यर्थः द्वेषं निरूपयति द्विष्टेति द्विष्टसाध

न्या. मु.
टी ७९

71

नताबुद्धिर्भवेद्द्वेषस्य कारणं बलवद्द्विष्टसाधनताज्ञानं कारणं तेन नान्तरीयकदुःखजनके
पाकादौ न द्वेषः यत्नं निरूपयति प्रवृत्तिश्चेति प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणं एव
प्रयत्नत्रैविध्यं तांत्रिकैः परिकीर्तितं प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदात् प्रयत्नस्त्रिविध इत्य
र्थः चिकीर्षेति चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा उपादानस्य चाध्यक्षं प्रवृत्तौ जन
कं भवेत् मधुविषसंपृक्तान्नभोजनादौ बलवदनिष्टानुबंधित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भा
वः कृतिसाध्यताज्ञानादिवत् बलवदनिष्टाननुबंधित्वज्ञानमपि स्वतंत्रान्वयव्यतिरेकात् प्रवृ
त्तौ कारणमित्यपि वदंति कार्यताज्ञानं प्रवर्तकमिति गुरवः तथाहि ज्ञानस्य प्रवृत्तौ जननीया
यां चिकीर्षातिरिक्तं नापेक्षितमस्ति सा च कृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारप्रका
रकधीसाध्यत्वनियमात् चिकीर्षा हि कृतिसाध्यप्रकारिकेच्छा अतः कृतिसाध्यत्वप्रकारकं तत्प्र ७९
कारकं ज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः न त्विष्टसाधनताज्ञानं तत्र हेतुः कृत्यसाध्येऽपि
प्रवृत्त्यापत्तेः ननु कृत्यसाध्यताज्ञानं प्रतिबंधकमिति चेन्न तदभावापेक्षया कृतिसाध्यताज्ञा

नस्यलघुत्वात् नचद्वयोरेवहेतुत्वेगौरवात् ननुतन्मतेपिमधुविषसंपृक्तान्नभक्षणे
वैद्यवदितेवप्रवृत्त्यापत्तिःकार्यताज्ञानसत्वादितिचेन्न स्वविशेषणवत्ताप्रतिसंधानज
न्यकार्यताज्ञानस्यप्रवर्तकत्वात् काम्येहियागादौकामनास्वविशेषणं ततश्चब
लवदनिष्टाननुबंधिकाम्यसाधनताज्ञानेनयत्कार्यताज्ञानंततःप्रवृत्तिः तृप्तस्यभोजने
नप्रवर्तते तदानींकामनायाःपुरुषविशेषणत्वाभावात् नित्येचशौचादिकंपुरुषवि
शेषणं तेनशौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्रप्रवृत्तिः नचतदपेक्षयाला
घवेनबलवदनिष्टाननुबंधीष्टसाधनताज्ञानमेवहेतुरस्तुबलवदनिष्टाननुबंधित्वं
चइष्टोत्पत्तिनांतरीयकदुःखाधिकदुःखाजनकत्वंबलवद्द्वेषविषयदुःखाजनकत्वं वे
तिचेन्न इष्टसाधनत्वकृतिसाध्यत्वयोर्युगपद्ज्ञानमशक्यत्वात् साध्यत्वसाधनत्वयो
र्विरोधात् असिद्धस्यहिसाध्यत्वंसिद्धस्यहिसाधनत्वं नचैकमेवैकदासिद्धम
सिद्धंचइतिज्ञायते तस्मात्कालभेदादुभयंज्ञायतइतिमैवम्लाघवेनबलवदनि

न्या॰ मु॰
टी॰ ७२

ष्टाननुबंधीष्टसाधनत्वेसतिकृतिसाध्यताज्ञानस्यहेतुत्वात् नचसाध्यत्वसाधनत्वयोर्विरो
धः यदाकदाचित्साध्यत्वसाधनत्वयोरविरोधात् एकदासाध्यत्वसाधनत्वयोरज्ञानात् ।
नवीनास्तु ममेदंकृतिसाध्यमितिज्ञानंप्रवर्तकं अनागतेतस्यज्ञातुमशक्यत्वात् किं
तु यादृशस्यपुंसःकृतिसाध्यंयद्दृष्टंतादृशत्वंस्वस्यप्रतिसंधायतत्रप्रवर्तते तेनौदनका
मस्यतत्साधनताज्ञानवतस्तदुपकरणवतःपाकःकृतिसाध्यस्तादृशश्चाहमितिप्र
तिसंधायपाकेप्रवर्ततइत्याहुः तन्न स्वकालिकतृप्त्यादिप्रवृत्तौयौवनेकामोद्रेदा
दिनासंभोगादौच तदभावात् इदंतुबोध्यं इदानीमिष्टसाधनत्वादिज्ञानंप्रवर्तकं ।
तेनभाविधौवराज्येबालस्यनप्रवृत्तिः तदानीकृतिसाध्यत्वाभावात् एवंतृप्तोभोज
नेनप्रवर्तते तदानीमिष्टसाधनत्वाज्ञानात् प्रवर्ततेचरोषदूषितचित्तोविषादिभ
क्षणे तदानींबलवदनिष्टाननुबंधित्वाज्ञानात् नचास्तिकस्यागम्यागमनतश्चवधा
दिप्रवृत्तौकथंबलवदनिष्टाननुबंधित्वबुद्धिर्नरकसाधनत्वज्ञानादितिवाच्यं उत्कटरा ।

७२

गादिनानरकसाधनधीतिरोधानात् हृष्टादौ च कृतिसाध्यताज्ञानाभावान्न चिकीर्षा
प्रवृत्ती किंत्विष्टसाधनताज्ञानादिच्छामात्रं कृतिस्तु प्रवृत्तिरूपा बाध्या तेन जीवनयो
नियत्नसाध्यप्राणपंचकसंचारेण प्रवृत्तिः इत्यन्ये च प्रवर्तकत्वानुरोधात् विधेरपि दृष्ट
साधनत्वादिकमेवार्थः इत्यन्ये च विश्वजिता यजेतेत्यादौ यत्र फलं न श्रूयेत तत्रापि स्वर्ग
फलं न कल्प्यते ननु अहरहः संध्यामुपासीतेत्यादौ इष्टानुत्पत्तेः प्रवृत्तिः कथं न चा
र्थवादिकं ब्रह्मलोकावाप्तिः प्रत्यवायाभावो वा फलमिति वाच्यं तथा सति काम्यत्वेन नि
त्यत्वाहान्यापत्तेः कामनाभावे चाकारणापत्तेः इत्यन्ये च फलश्रुतिस्तत्रार्थवादमात्र
मितिचेन्न यहणश्राद्धादौ नित्यत्वनैमित्तकत्वादिवन्नित्यत्वकाम्यत्वयोरप्यविरोधात्
नच कामनाभावे चाकारणापत्तिः त्रिकालसंध्यपाठादाविव कामनासद्भावस्यैव वा
त्यनात् ननु वेदबोधितकार्यताज्ञानात्प्रवृत्तिः संभवतीति चेन्न स्वेष्टसाधनत्व
मज्ञात्वा तादृशकार्यताज्ञानसहस्रेणापि प्रवृत्तेरसंभवात् यदपि पंडापूर्वं फलं तदपि

न्या॰ मु॰
टी॰ ७३
73

नकामनाभावेऽकारणापत्तेस्तौल्यात् कामनाकल्पनेस्वार्थवादिकं फलमेव रात्रिसत्राप
त्वात्फलं अन्यथाश्रुत्यनुमितेः तेनानुपपत्तिं प्रत्यवायस्य तथा वान्यो मन्यते एवं संध्या
मुपासते ये तु सततं संशितव्रताः विधूतपापास्ते यांति ब्रह्मलोकमनामयं एवं द्वार
हरहः श्राद्धं पितृभ्यः प्रीतिमावहन् इत्यादिकमेव फलमस्तु न च पित्रादिप्रीतिः कथं फले
व्यधिकरणत्वादिति वाच्यं गयाश्राद्धादाविवात्रेऽपि स्वसंबंधेनैव फलजनकत्वस्यैव।
काचित्कल्पनात् अत एवाकं शास्त्रेऽपि कं फलमनुष्ठानेऽनुत्सर्गादौ इति पित्रणार
मुक्तोव तु स्वस्य स्वर्गादिफलेयावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलक
त्वात् पंडापूर्वापर्यपुक्तनिष्फलं न संभवति नहि तुल्यत्वे दुःखाभाववत्स्वतः पुरुषार्थः
नवान्त्साधने प्रत्यवायानुत्पत्तेः कथं प्रवृत्तिरिति चेन् इत्थं यथा हि नित्ये कृते प्रत्यवा ७३
याभावस्तिष्ठति तदभावे तदभाव एवं प्रत्यवायाभावसत्त्वे दुःखप्रागभावसत्त्वं तदभा
वे तदभाव इति योगे तेषु साधारणकारणतायाः दुःखप्रागभावेऽप्यपि सत्त्ववचनात् ॥

एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थैक
देशे नञर्थान्वयः इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादि
ति चेन्न तत्र बाधात्कृतिसाध्यत्वमिष्टसाधनत्वं च न विध्यर्थः किन्तु बलवदनिष्टाननुबन्धि
त्वमात्रं तदभावश्च नञा बोध्यते अथवा बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृ
तिसाध्यत्वं विध्यर्थः तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशे
षणाभावे विश्राम्यति ननु श्येनेनाभिचरन् यजेतेत्यत्र कथं बलवदनिष्टाननु
बन्धित्वं विध्यर्थः श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात् न
चवैधत्वान्न निषेध इति वाच्यं अभिचारे प्रायश्चित्तोपदेशात् न च मरणानुकूल
व्यापारमात्रं यदि हिंसा न तदा खड्गकारस्य कूपकर्तुश्च हिंसात्वापत्तिः गरलस्यान्न
भक्षणजन्यमरणे आत्महन्तृत्वापत्तिश्चेति वाच्यं मरणोद्देश्यकत्वविशेषणात्।
अन्योद्देश्यकत्विष्टनाशवहतत्वात्मनाशस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न श्येनवा

न्या॰ मु॰
टी॰ ७५

79

याद्दष्टाद्वारकत्वविशेषणात् अतएव काशीमरणस्यादृष्टद्वारा तथाविधश्वजादेरपि न हिंसात्वम्
न च साक्षात्त्वम्मरणजनकस्यैव हिंसात्वं श्येनस्तु न तथा किं तु तज्जन्यापूर्वमिति वाच्यम् खड्ग
घातेन व्रणपाकपरंपरयामृतेर्हिंसात्वानापत्तेः केचित्तु श्येनस्य हिंसाफलं न तु मरणम्
तेन श्येनजन्यखड्गपातादिरूपा हिंसाभिचारपदार्थः तस्य च पापजनकत्वं अतः श्येन
स्यवैधत्वात्पापजनकत्वेपि अग्नीषोमीयपापं प्रति संध्यायंततो न पुनर्वर्तेत्तद्दूष्याह्नः आचार्या
स्तु आप्ताभिप्रायो विध्यर्थः पाकं कुर्यादित्यादौ आज्ञादिरूपेच्छावाचित्ववत् लिङ्ग
त्वस्येच्छावाचित्वलाघवात् एवं च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामकृतिसाध्य
तयाप्ताभिप्रेत इत्यर्थः ततश्चाभिप्रेतत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्तते कलञ्जभक्ष
णे तदभावान्न प्रवर्तते यत्तु वेदे पौरुषेयत्वेनाभ्युपगते तं प्रति विधेर्बलावद्भंगत्व ७५
स्मृतिस्तु मार्गाः श्रुयोगमात्रे न च कर्तृस्मरणबाधकं कपिलकणादादिकमारभ्याद्यप
र्यंतं कर्तृस्मरणस्यैवमानत्वात् अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः तेन वेदकर्तृत्व

स्मरणमस्तीति यदि तदा वेदेपि कर्त्तारं स्मरन्ति जज्ञिरे तस्मादित्यादि कर्तृस्मरणमस्त्येवेति
एवं श्रुतिमन्वन्तरे वैषाम्यानिरन्यापि हृषपतद्रष्यापि द्रष्टव्यं स्वयंभूरेष भगवान् वेदो गी
तस्त्वया पुरा शिवाद्या ऋषिपर्यन्ताः स्मर्तारोस्य न कारकाः इति वेदस्तुतिमात्रं न चैपौ
रुषेयत्वे भ्रमादिसंभावनया अप्रामाण्यं स्यादिति वाच्यं नित्यसर्वज्ञत्वेन निर्दोषत्वात् अत ए
व गुरुत्वान्तरस्य भ्रमादिसंभवात् कपिलादेः कर्तृत्वे वेदस्य किं वर्णानामेवानित्यत्वस्य
वक्ष्यमाणत्वान्न तत्रैतत्तदर्थमस्य वेदस्यानित्यत्वमिति उपादानस्य समवायिकारण
स्याध्यक्षं प्रवृत्तौ कारणमिति निवृत्तिरिति निवृत्तिश्च भवेद्द्वेषाद् द्विष्टसाधनताधियः
द्विष्टसाधनताज्ञानस्य निवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारितमिति
भावः यत्न इति यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् जीवनयोनियत्नो याव
ज्जीवमनुवर्तते स चातीन्द्रियः तत्र प्रमाणमाह शरीरे प्राणसंचारकारणं तत्र कीर्ति
तम् प्राणसंचारो हि स्वधिवाप्यासादिप्रयत्नसाध्यः इत्थं च प्राणसंचारस्य सर्वस्य र

यत्नसाध्यत्वानुमानात् प्रयत्नत्वयत्नबाधाच्चातीन्द्रियत्वसिद्धिः मरणवजीवनयोनियत
त्नः गुरुत्वं निरूपयति अतीन्द्रियमिति अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये हि तत् अ
नित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतं तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि ॥
अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यं नित्ये परमाणौ नित्यं गुरुत्वमित्यनुवर्तते तद्गुरुत्व
मसमवायिकारणं पततेनेति आद्यपतनेत्यर्थः द्रवत्वं निरूपयति सांसिद्धिकमिति सांसि
द्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरं सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः द्रवत्व
द्विविधं सांसिद्धिकं नैमित्तिकं चेत्यर्थः द्वितीयं नैमित्तिकं परमाणावपि परमाणौ
जले नित्यमन्यत्रानित्यमुच्यते नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु द्रवत्वं स्य
दने हेतुर्निमित्तं संग्रहे तु तत् जलपरमाणौ द्रवत्वं नित्यं अन्यत्र पृथिवीपरमाण्वादौ
चानित्यं कुत्रचित्तेजसि कुत्रचित्पृथिव्यां नैमित्तिकं द्रवत्वं तेन च कोवा नैमित्तकार्थं स
दर्शयति अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वं नच सुवर्णादिरूपे तेजसि जलत्वप्रसक्तिरिति ॥ ७५

क्रियायां च वर्तत इत्यर्थः हेत्वादिरिति असमवायिकारणं संग्रहे सत्कादिसंयोगविशेषेतर
वत्वे स्नेहसहिते बोध्यं तेन द्रुतसुवर्णादिना संग्रहः स्नेहं निरूपयति स्नेह इति स्ने
हो जले स नित्योऽवयविन्यसौ जल एवेत्यर्थः स स्नेहः ननु पृथिव्यामपि तैले स्नेह
उपलभ्यते न चासौ जलीयः तथा सति दहनप्रातिकूल्यप्रसंगात् तत्राह तैलान्तर्ग
त्मकर्षाद्दहनस्यानुकूलता तत्प्रकर्षात्स्नेहप्रकर्षात् तैले उपलभ्यमानस्नेहोऽपि
जलीय एव तस्य प्रकृष्टत्वात् अग्नेरानुकूल्यं अपकृष्टस्नेहजले वह्निविनाशय
तीति भावः संस्कारं निरूपयति संस्कार इति संस्कारभेदो वेगोऽथ स्थितिस्थापकभाव
ने मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् वेगः स्थितिस्थापकभावनाभेदात्संस्का
रः त्रिविध इत्यर्थः कर्मज इति वेगो द्विविध इत्यर्थः शराद्यादौ हि नोदनाजनितेन क
र्मणा वेगो जन्यते तेन च पूर्वकर्मनाशस्तदुत्तरं कर्म एवमग्रेऽपि कर्मणः विना च वेगं
कर्मप्रतिबंधकत्वात्पूर्वकर्मनाशोत्तरकर्मोत्पत्तिश्च न स्यात् यत्र च वेगवता कपाले

न्या॰ मु॰
टी॰ ७६
76

न जनितत्वं देवेगो जन्यते स वेगजो वेगः स्थितिस्थापके त्विति स्थितिस्थापकसं-
स्कारः त्विति तो वेगविलक्षणोऽपि अतीन्द्रियमहिमेयं क्वचित्स्पन्दकारणं आकृष्ट-
शाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात् केचिदिति चक्षु-
र्षु तिन्यादिषु स्थितिस्थापके केचिन्मन्यन्ते तत्र प्रमाणमिति भावः न स्थितिस्था-
पकं क्वचिदाकृष्टशाखादौ भावनाख्य इति भावनाख्यस्तु संस्कारो जीववृ-
त्तिरतीन्द्रियः उपेक्षानात्मकज्ञानस्य निश्चयः कारणं भवेत् तस्य संस्कारस्य
उपेक्षात्मकज्ञानात् संस्कारानुत्पत्तेः उपेक्षानात्मकश्च भेदके तत्संशयात्मकेतरानुभ-
वे निश्चयत्वमुक्तं तेन तु उपेक्षान्यनिश्चयत्वेन न हेतुत्वं साक्षात्सिद्धत्वात् संस्कारं प्रति हेतु-
त्वमिति भावः ननु स्मरणं प्रति उपेक्षान्यनिश्चयत्वेन हेतुत्वे तेनोपेक्षादिस्थले न ७६
स्मरणं इत्थं च संस्कारं प्रति ज्ञानत्वेन हेतुता लाघवादिति चेन्न विनिगमनाविरहेण
पि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् किं च उपेक्षास्थले सं-

स्कारकल्पनायाः गुरुत्वात् संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सि
द्धत्वात् तत्र प्रमाणमदर्शयति स्मरणमिति स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्य
ते असौ संस्कारः यतः स्मरणं प्रत्यभिज्ञां च जनयति अतः संस्कारः कल्प्यते ।
विना व्यापारेण पूर्वानुभूतस्मरणादिजननासामर्थ्यात् स्वस्वव्यापारान्यतराभावे
कारणत्वासंभवात् न च प्रत्यभिज्ञां प्रति संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कार
जन्यत्वेन स्मृतित्वापत्तिरिति वाच्यं अप्रयोजकत्वात् परे तु अनुद्बुद्धसंस्कारात्प्र
त्यभिज्ञानुदयात् उद्बुद्धसंस्कारस्यैव हेतुत्वापत्त्या स्मरणस्यैव प्रत्यभिज्ञां प्रति हे
तुत्वं कल्प्यत इत्याहुः अदृष्टं निरूपयति धर्माधर्माविति धर्माधर्मावदृष्टं स्या
त् धर्मः स्वर्गादिसाधने गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः स्वर्गादि
सकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधने धर्म इत्यर्थः तत्र प्रमा
णं दर्शयितुमाह स्वर्गादीति यागादिव्यापारस्तथाहि धर्मः कल्प्यते अन्यथा

न्या॰ मु॰
टी॰ ११

77

यागादीनां चिरविनष्टत्वान्निर्व्यापारत्वाच्च कालान्तरभाविस्वर्गजनकत्वेन स्यादि
त्युक्तमाचार्यैः चिरध्वस्तं फलायालं न कर्मातिशयं विनेति ननु यागध्वंस एव
व्यापारः स्यात् न च प्रतियोगिध्वंसयोरेकत्राजनकत्वं पूर्वं तथात्वे मानाभावात्
अत आह गंगास्नानादीति गंगास्नानस्य हि स्वर्गजनकत्वे अनेकानां जलसं-
योगध्वंसानां व्यापारत्वमपेक्ष्यैकमेवापूर्वं कल्प्यते लाघवादिति भावः ननु ध्वंसो
न व्यापारोस्तु न च तद्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम् अन-
न्यथासिद्धनियतपूर्ववर्तित्वस्य तत्रापि सत्वात् अव्यवहितपूर्ववर्तित्वं हि वक्तुः
संयोगादेरकारणत्वे ननु सर्वत्र कार्यकालवर्तित्वमिव समवायिकारणस्य का-
रणत्वं स्यात्तत्राह कर्मनाशेति कर्मनाशाजलस्पर्शादिना नाशः फलस्य सोमतः ११
अधर्मानरकादीनां हेतुर्निन्दितकर्मजः प्रायश्चित्तादि नाश्यः सो जीवहत्यावि
शेषगुणो ध्वंसोऽत्र वासनाजन्यो ज्ञानादपि विनश्यतः यदि हि अपूर्वं न स्यात् ।

तदा कर्मनाशागङ्गलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात् नहि तेन यागादेर्नाशः
प्रतिबन्धो वा कर्तुं शक्यते तेन स्पर्शं एव हतत्वादिति एतेन देवताप्रीतिरेव फलमि
त्यपास्तं देवताया अचेतनत्वात् हिरण्यदानादौ सर्वत्र देवताप्रीतेरसंभवाच्च
देवतायाश्चेतनत्वेपि तत्प्रीतेरदृष्टजनकत्वात् शनैः स्वरूपेण विलम्बप्रीत्यादौ तद
संभवात् जन्यसुखस्य तत्राभावात् तेन विलम्बप्रीतिजन्यत्वेन पराभिमतः स्वर्गा
दिरेव विवक्ष्यते नरकादीनामिति नरकदुःखादिसकलदुःखानां नारकि
कशरीरादीनां च साधनेष्वधर्मशब्दार्थः तत्र प्रमाणमाह प्रायश्चित्तादिनाश्य
इति यदि हि स्यादधर्मो न स्यात्तदा प्रायश्चित्तादिना नाश्यत्वं न स्यात् नहि तेन ब्रह्म
हननादेर्नाशः प्रतिबन्धो वा कर्तुं शक्यते तेन स्पर्शं न ष्टत्वादिति भावः जीवेति
ईश्वरस्य धर्माधर्माभावादिति भावः इमौ धर्माधर्मौ वासनेति मुक्तात्मानि ना
शेनेश्वरेपि ईश्वरेण न दुष्कृतकर्मणो न फलायालं वासनाभावात् इति भावः ज्ञाना

रणीन्यपि नाभोगपरिग्रहः ननु तत्त्वज्ञानस्य बाध्यधर्माधर्मनाशकत्वं नाभुक्तं क्षीय
ते कर्म कल्पकोटिशतैरपि इति वचनविरोधात् इत्थं च तत्त्वज्ञानिनोऽदृष्टकायव्यू
हेन सकलकर्मणां भोगेनोपपत्तेः इति चेन्न तत्र भोगस्यैव वेदबोधितनाशकोपलब्धि
त्वात् कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः तदुक्तं ज्ञानाग्निः सर्वकर्मा
णि भस्मसात्कुरुते तथेति क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति ननु त
त्त्वज्ञानिनस्तर्हि शरीरावस्थानं न स्याद् दुःखं वा किञ्चन स्यात् ज्ञानेन सर्वेषां कर्मणां
नाशादिति चेन्न प्रारब्धेतरकर्मणामेव नाशात् शरीरभोगजनकं हि यत् कर्म
तत्प्रारब्धं तदभिप्रायमेव नाभुक्तमित्यादिवचनमिति शब्दं निरूपयति शब्द
इति शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः कण्ठसंयोगादिजन्या वर्णास्ते
कादयो मताः सर्वशब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते नभोवृत्तिराकाशस
मवेतः हरस्य शब्दस्याग्रहणादाह श्रोत्रेति ननु मृदङ्गाद्यवच्छेदेनोत्पन्नशब्दः ७८

श्रोत्रे च कथं तदुत्पत्तिरित्यत आह वीचीति वीचीतरङ्गन्यायेन तदुत्पत्तिस्तत्र कीर्ति
ता आद्यशब्दस्य बहिर्देशोत्पत्तिर्वीचिन्यायोऽन्यः शब्दस्तेनैव शब्देनोत्पद्यते स च
आद्यशब्दव्यापकः एवं क्रमेण श्रोत्रेऽन्त्यशब्दोपलम्भनं इति कदंबेति कदंबगो
लकन्यायात्तदुत्पत्तिः कस्यचिन्मते उत्पन्नः कः विनष्टः क इति बुद्धेरनित्यता सो
ऽयं ककार इति बुद्धिस्तु साजात्यमवलम्बते तदेवौषधमित्यादौ सजातीयेऽपि दर्श
नात् आद्यशब्दाद्दशदिक्षु दश शब्दा उत्पद्यन्ते तेभ्यश्चान्ये दश शब्दा उत्पद्यन्त इ
ति भावः अस्मिन्काले गौरवादुक्तं कस्यचिन्मत इति ननु शब्दस्यानित्यत्वा
दुत्पत्तिकथनमसंगतमत आह उत्पन्न इति शब्दानामुत्पादविनाशशालि
त्वादनित्यत्वमित्यर्थः ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां
नित्यत्वे इत्येवोत्पादविनाशबुद्धिर्भ्रममूलैवेत्यत आह सोयमिति तत्र हि
प्रत्यभिज्ञानस्य तत्सजातीयत्वे विषयो ननु तद्व्यक्त्यभेदो विषयः उभयत्रा

त्विविरोधात् इत्थं च द्वयोरपि बुद्ध्योर्न भ्रमत्वमिति ननु सोयमिति प्रत्यभिज्ञाऽत्र
त्वस्य सजातीयादित्यत आह तदेवेति यदेवौषधं मया कृतं तदेवौषधमन्येना
पि कृतमित्यादिदर्शनादितिभावः ॥ इति श्रीमन्महोपाध्यायपंचाननभट्टा
चार्यविरचिता सिद्धान्तमुक्तावली समाप्ता ॥ शुभमस्तु लेखकपाठकयोः
श्रीरामाय नमः ॥ संवत् ६ वैशाखवदि १५ लिखितं कैलासेन ॥ ॐ तत्सत्